श्री चौखम्भा राजसेवा ग्रन्थमाला ६३

रुद्रयागहवनमन्त्रविधिः

(रुद्रयागस्य सप्तभिः प्रकारैर्हवनमन्त्रविधिसहितः)

...ज्ञिकसम्राट् पण्डित श्रीवेणीरामशर्मा गौड

चौखम्भा ओरियन्टालिया

वाराणसी दिल्ली

CSUGCKL
Q2:494
Acc.No: 11960
1
11960

श्री चौखम्भा राजसेवा ग्रन्थमाला ६३

रुद्रयागहवनमन्त्रविधिः

(रुद्रयागस्य सप्तभिः प्रकारैर्हवनमन्त्रविधिसहितः)

Sanskrit Sansthan Deemed University, Ministry of H.R.D, Govt. of India
GURUVAYOOR CAMPUS
PURANATTUKARA
THRISSUR
KERALA 680 551
LIBRARY

सम्पादक

याज्ञिकसम्राट्

पण्डित श्रीवेणीरामशर्मा गौड

चौखम्भा ओरियन्टालिया

वाराणसी दिल्ली

CAT NO. 2590. HOLD ID. 43551.
Location:
Book No. 1
14-3-3

प्रकाशक :—

चौखम्भा ओरियन्टालिया

पो० आ० चौखम्भा, पो० बा० नं० ३२
गोकुल भवन, के. ३७/१०६, गोपाल मन्दिर लेन
वाराणसी–२२१००१ (भारत)
टेलीफोन : ६३३५४ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर
दिल्ली–११०००७ फोन : २२१६१७

© चौखम्भा ओरियन्टालिया

प्रथम संस्करण १९८३
मूल्य रु० ५–५०

मुद्रक—श्रीगोकुल मुद्रणालय, वाराणसी

CHAUKHAMBHA RAJASEVA SERIES
NO. 63

METHOD OF OFFERING OBLATION WITH HYMNS IN THE RUDRA SACRIFICE

[seven modes of offerings in the Rudra sacrifice]

By

Pt. BEṆĪRĀMA ŚARMĀ GAUḌA
Vedācārya, Kāvyatīrtha
Formerly Head of the Veda section
Goenaka Sanskrit College, Varanasi

CHAUKHAMBHA ORIENTALIA
A House of Oriental and Antiquarian Books
VARANASI DELHI

Publishers :

CHAUKHAMBHA ORIENTALIA

A House of Oriental and Antiquarian Books

P. O. Chaukhambha, Post Box No. 32

Gokul Bhawan, K. 37/109, Gopal Mandir Lane

VARANASI-221001 (India)

Telephone : 63354 Telegram : Gokulotsav

Branch—Bungalow Road, 9 U. B. Jawahar Nagar,

DELHI-110007 (India) [Phone : 221617]

92:494

LIBRARY
ACCESSION NO: 11960
Date 15/12/83
PURANATTUKARA TRIC

© *Chaukhambha Orientalia*

First Edition 1983

Price Rs. 5-50

Printers—Srigokul Mudranalaya, Varanasi

पं० वेणीराम शर्मा गौड

दोशब्द

रुद्रयाग, महारुद्रयाग और अतिरुद्रयागमें प्रधान हवन शुक्लयजुर्वेदीय रुद्राष्टाध्यायीके सम्पूर्ण पाँचवें अध्यायसे होता है। पाँचवे अध्यायमें नमस्तेकी आहुतिमें आठ पक्ष कहे गये हैं। यथा— सम्पूर्ण नमस्तेकी १ आहुति, सम्पूर्ण नमंस्तेकी ३ आहुति, सम्पूर्ण नमस्तेकी ६ आहुति, सम्पूर्ण नमस्तेकी १६ आहुति, सम्पूर्ण नमस्तेकी ४४ आहुति, सम्पूर्ण नमस्तेकी ४८ आहुति, सम्पूर्ण नमस्तेकी १६१ आहुति और सम्पूर्ण नमस्तेकी ४२५ आहुति। वर्तमान समयमें १६१ आहुतियोंके द्वारा रुद्रयाग अधिक प्रचलित है।

कुछ यज्ञकर्ता यजमान तिल, यव आदिके अभावके कारण रुद्रयाग, महारुद्रयाग और अतिरुद्रयागमें उचित हवन-सामग्रीकी ठीक-ठीक व्यवस्था नहीं कर पाते। क्योंकि बहुत स्थानों में, विशेषत: विदेशोंमें तिल, यव आदि पर्याप्तरूपमें नहीं मिलता। अत: यज्ञकर्ताओंको बाध्य होकर अल्प आहुतिवाले पक्षको ग्रहण कर रुद्रयागादि करना पड़ता है। अतएव मैंने यज्ञकर्ता यजमानोंकी सुविधार्थ 'रुद्रयाग-हवनविधि'मेंरुद्रयज्ञार्थ सात प्रकारकी आहुतियोंका अलग-अलग उल्लेख किया है।

इसलिये यज्ञकर्ता यजमान अपनी सुविधाके अनुसार किसी भी एक नमस्तेकी आहुतिके पक्षको ग्रहण कर रुद्रयाग कर सकते हैं। रुद्रयाग करनेके लिये जितने भी आहुतिके पक्ष कहे गये हैं, वे सभी महत्त्वपूर्ण हैं और उन सभीका फल समानरूपमें ही कहा गया है।

नैरोबी (केनिया) में महारुद्र यज्ञ

मैं सन् १९७८ में 'महारुद्रयज्ञ' कराने नैरोबी (केनिया) गया था। मुझे नैरोबीकी 'कच्छी गुजराती हिन्दू युनियन संस्था' के चेयरमेन श्रीयुत डा० एस. एम. भट्ट महोदयने एकादश कुण्डोंवाले महारुद्रयज्ञको करानेके लिये नैरोबीमें बुलाया था। नैरोबीमें 'कच्छी गुजराती हिन्दू युनियन संस्था' है, जिसके अन्तर्गत एक विशाल विश्वनाथ-मन्दिर है। विश्वनाथ-मन्दिरके 'सुवर्णजयन्ती महोत्सव' के उपलक्ष्यमें उक्त संस्थाने 'महारुद्रयज्ञ' किया था। महारुद्रयज्ञके समय मुझे पता चला कि नैरोबीमें अधिकाधिक मूल्य देने पर भी उचित मात्रामें तिल प्राप्त नहीं हो सकता। अतः मैंने विवश होकर १६ मन्त्रोंके हवनमन्त्रके पक्षको ग्रहण कर 'महारुद्रयज्ञ' कराया। उसी समय मैंने नैरोबीमें निश्चय किया कि एक 'रुद्रयाग-हवनविधि' की ऐसी पुस्तक प्रकाशित की जाय, जिसमें रुद्रयागकी

सभी प्रकार की आहुतियों का संग्रह हो, जिसके द्वारा रुद्रयज्ञके यजमान रुद्रयज्ञ कराकर यज्ञका ठीक-ठीक फल प्राप्त कर सकें।'

भगवान् शिवजीकी कृपासे आज 'रुद्रयाग–हवनविधि' प्रकाशित हो गई, जिससे मेरा कृतसंकल्प पूर्ण हो गया। आशा है, इस 'रुद्रयाग–हवनविधि' से रुद्रयाग करनेवाले यज्ञकर्ता यजमानों और यज्ञके ऋत्विजोंको विशेष लाभ होगा।

इस 'रुद्रयाग-हवनविधि' में न्याससहित विष्णुयाग और लक्ष्मीयागके हवन-मन्त्र भी दिये गये हैं। अन्तमें रुद्रयाग और विष्णुयागका 'बृहत् संकल्प' भी दिया गया है, जिससे याज्ञिकोंको विशेष लाभ होगा। मैं चौखम्भा ओरियन्टालिया, वाराणसीके अध्यक्ष महोदयको हार्दिक धन्यवाद देता हूँ, जिन्होंने 'रुद्रयाग-हवनविधि' को प्रकाशित कर यज्ञप्रेमियोंका विशेष कल्याण किया है।

शिवरात्रिपर्व
संवत् २०३९

वेणीराम गौड वेदाचार्य

विषय-सूची

महारुद्रन्यासः १

रुद्रयागहवनमन्त्रविधिः १९

रुद्रयागस्य षड्भिः प्रकारैर्हवनमन्त्रविभागस्तत्र एकधाहवनमन्त्रविभागपक्षः प्रथमः ३९

त्रेधाहवनमन्त्रविभागपक्षः द्वितीयः ३९

षोढा (षडधा) हवनमन्त्रविभागपक्षस्तृतीयः ४०

षोडशधा हवनमन्त्रविभागपक्षश्चतुर्थः ४१

चतुश्चत्वारिंशद्धवनमन्त्रविभागपक्षः पञ्चमः ४२

अथाष्टचत्वारिंशद्धवनमन्त्रविभागपक्षः षष्ठः ४८

बृहत् पुरुषसूक्तन्यासः(छन्दःपुरुषन्यासः) ५४

विष्णुयागमन्त्राः ५९

श्रीसूक्तन्यासः ६२

लक्ष्मीयागस्वाहाकारमन्त्राः ६५

रुद्रयागसङ्कल्पः ६८

विष्णुयागस्य बृहत् सङ्कल्पः ६९

अथ महारुद्रन्यासः

धृतपवित्रः। आचम्य प्राणानायम्य। ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने। तिष्ठ देवि शिखामध्ये चामुण्डे ह्यपराजिते॥ इति शिखाग्रन्थिकरणम्।

सहस्राणीत्यस्य परमेष्ठी ऋषिरनुष्टुप् छन्दः एको रुद्रो देवता महीप्रार्थने विनियोगः।

ॐ सहस्राणि सहस्रशः०।

य ऽएतावन्तश्चेत्यस्य परमेष्ठी ऋषिरनुष्टुप् छन्दः बहवो रुद्रा देवताः ककुभां प्रार्थने वि०।

ॐ य ऽएतावन्तश्च०।

पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसने वि०।

ॐ पृथ्वि त्वया धृता लोका०। (प्राङ्मुखेनोदङ्मुखेनोपवेशनम्)।

सद्योजातमित्यस्य सद्योजात ऋषिस्त्रिष्टुप्छन्दः ब्रह्मा देवता, वामदेवायेत्यस्य वामदेव ऋषिर्जगती छन्दः विष्णुर्देवता, अघोरेभ्य इत्यस्य अघोर ऋषिरनुष्टुप्छन्दः रुद्रो देवता, ईशान इत्यस्य ईशान ऋषिरनुष्टुप् छन्दः रुद्रो देवता सर्वेषां भस्मपरिग्रहणे वि०।

ॐ सद्योजातं प्रपद्यामि०। ॐ वामदेवाय नमो०। ॐ अघोरेभ्यो०। ॐ तत्पुरुषाय विद्महे० ॐ ईशानः सर्व०। एभिर्मन्त्रै (गार्हपत्यावसथ्यान्यतरसम्भवस्य भस्मनः) भस्मनो दक्षिणहस्तेन गृहीत्वा सव्यहस्ते करणम्।

अग्निरित्यादिभस्माभिमन्त्रणमन्त्राणां पिप्पलाद ऋषिर्गायत्री छन्दः कालाग्निरुद्रो देवता भस्माभिमन्त्रणे विनियोगः ।

"ॐ अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, सर्वᳬं हवा इदं भस्म, मन इत्येतानि चक्षूंषि भस्मानि तस्माद् व्रतमेतत्पाशुपतं यद् भस्मनाङ्गानि संस्पृशेत्तस्माद् व्रतमेतत्पाशुपतं पशुपाशविमोक्षाय" इति त्रिः पठित्वा (कृत्वा) भस्मनोऽभिमन्त्रणम् । दक्षिणहस्तेनाच्छादनम् ।

आपो ज्योतिरित्यस्य प्रजापतिर्ऋषिर्यजुश्छन्दः ब्रह्माग्निवायुसूर्या देवता भस्मन्यपामासेचने वि० ।

ॐ आपो ज्योतीरसो० स्वरोऽम् । इति मन्त्रं पठित्वा जलेन सिञ्चेत् । "ॐ नमः शिवाय" इति सम्मर्दनम् । ततः सर्वाङ्गे भस्मोद्धूलनम् ।

ईशानेत्यस्य ईशान ऋषिरनुष्टुप्छन्दः रुद्रो देवता शिरसि भस्मोद्धूलने वि० ।

ॐ ईशानः सर्वविद्यानामीश्वरः सर्व० इति शिरसि ।

तत्पुरुषायेत्यस्य तत्पुरुष ऋषिर्गायत्री छन्दः रुद्रो देवता मुखे भस्मोद्धूलने वि० ।

ॐ तत्पुरुषाय विद्महे० इति मुखे ।

अघोरेभ्य इत्यस्य अघोर ऋषिरनुष्टुप्छन्दः रुद्रो देवता हृदये भस्मोद्धूलने वि० ।

ॐ अघोरेभ्योऽथघोरेभ्यो० इति हृदये ।

वामदेवायेत्यस्य वामदेव ऋषिर्जगती छन्दः विष्णुर्देवता गुह्ये भस्मोद्धूलने वि० ।

ॐ वामदेवाय नमो ज्येष्ठाय० इति गुह्ये ।

सद्योजातमित्यस्य सद्योजात ऋषिस्त्रिष्टुप्छन्दः ब्रह्मा देवता पादयोर्भस्मोद्धूलने वि० ।

ॐ सद्योजातं प्रपद्यामि० इति पादयोः । प्रणवेन (ॐ इत्यनेन) मस्तकादिपादान्तं सर्वाङ्गेषु । ततस्त्रिपुण्ड्रधारणम् ।

मानस्तोक इत्यस्य कुत्स ऋषिर्जगती छन्दः एको रुद्रो देवता भस्मोद्धारणे वि० ।

ॐ मानस्तोके तनये० इति भस्मोद्धारणम् ।

त्र्यम्बकमित्यस्य वसिष्ठ ऋषिरनुष्टुप्छन्दः त्र्यम्बको रुद्रो देवता, त्र्यायुषमित्यस्य नारायण ऋषिरुष्णिक् छन्दः आशीर्देवता, भस्मना त्रिपुण्ड्रधारणे वि० ।

यास्य प्रथमा रेखा सा गार्हपत्यश्चाकारो रजोभूर्लोकश्चात्मा क्रियाशक्तिर्ऋग्वेदः प्रातःसवनं महादेवो देवता ।

यास्य द्वितीया रेखा सा दक्षिणाग्निरुकारः सत्वमन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यन्दिनं सवनं महेश्वरो देवता ।

यास्य तृतीया रेखा सा आहवनीयो मकारस्तमोद्यौर्लोकः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयं सवनं शिवो देवता ।

ॐ त्र्यम्बकं यजामहे०। ॐ त्र्यायुषं जमदग्नेः०। इति तर्जनीमध्यमाऽनामिकाभिः शिरसि, नेत्रयोः, वक्षसि, स्कन्धयोः। अथवा—ललाटे, बाह्वोः, हृदये, नाभौ च-इत्येवं स्थानेषु त्रिपुण्ड्रधारणम्।

"ॐ नमः शिवाय?" इत्यनेन अथवा "ॐ त्र्यम्बकं यजामहे०" इत्यनेन रुद्राक्षधारणम्।

अथ छन्दः पुरुषस्य शरीरे न्यासाः—

अङ्गुष्ठानामिकाभ्यां न्यासान् कुर्यात्। तद्यथा—

ॐ तिर्यग्बिलाय चमसायोर्ध्वबुध्नाय छन्दःपुरुषाय नमः इति शिरसि।

ॐ गौतम-भरद्वाजाभ्यां नमः इति नेत्रयोः।

ॐ विश्वामित्र-जमदग्निभ्यां नमः इति श्रोत्रयोः।

ॐ वसिष्ठ-कश्यपाभ्यां नमः इति नासापुटयोः।

ॐ अत्रये नमः इति वाचि।

ॐ गायत्र्यै छन्दसे नमः अग्नये नमः इति शिरसि।

ॐ उष्णिहे छन्दसे नमः सवित्रे नमः इति ग्रीवायाम्।

ॐ बृहत्यै छन्दसे नमः बृहस्पतये नमः इत्यनूके (पृष्ठे)।

ॐ बृहद्रथान्तराभ्यां नमः द्यावापृथिवीभ्यां नमः इति बाह्वोः।

ॐ त्रिष्टुभे छन्दसे नमः इन्द्राय नमः इति मध्ये (उदरे)।
ॐ जगत्यै छन्दसे नमः आदित्याय नमः इति शीर्ष्णोः।
ॐ अतिच्छन्दसे नमः प्रजापतये नमः इति लिङ्गे। (उदकोपस्पर्शः)।
ॐ यज्ञायज्ञियाय छन्दसे नमः वैश्वानराय नमः इति पायौ (गुदे)।
ॐ अनुष्टुभे छन्दसे नमः विश्वेभ्यो देवेभ्यो नमः इति ऊर्वोः।
ॐ पङ्क्त्यै छन्दसे नमः मरुद्भ्यो नमः इति जान्वोः।
ॐ द्विपदायै छन्दसे नमः विष्णवे नमः इति पादयोः।
ॐ विच्छन्दसे नमः वायवे नमः इति प्राणेषु।
ॐ न्यूनाक्षराय छन्दसे नमः अद्भ्यो नमः इति मस्तकादिपादान्तं हस्तद्वयविपर्यासेन।
मनो जूतिरित्यस्य आङ्गिरसो बृहस्पतिर्ऋषिर्यजुश्छन्दः विश्वेदेवा देवता हृदयन्यासे वि०।
ॐ मनो जूतिर्जुषताम्० हृदयाय नमः।
अबोध्यग्निरित्यस्य बुधगविष्ठिरा ऋषी त्रिष्टुप्छन्दः अग्निर्देवता शिरोन्यासे वि०।
ॐ अबोध्यग्निः० शिरसे स्वाहा।
मूर्धानमित्यस्य भरद्वाज ऋषिस्त्रिष्टुप् छन्दः वैश्वानरोऽग्निर्देवता शिखान्यासे वि०।
ॐ मूर्धानं दिवः० शिखायै वषट्।
मर्म्माणि त इत्यस्य विवस्वानृषिस्त्रिष्टुप्छन्दः लिङ्गोक्ता देवता कवचन्यासे वि०।

ॐ मर्म्माणि ते० कवचाय हुम् ।

विश्वतश्चक्षुरित्यस्य विश्वकर्मा भौवन ऋषिस्त्रिष्टुप्छन्दः विश्वकर्मा देवता नेत्रन्यासे विनियोगः।

ॐ विश्वतश्चक्षुः० नेत्रत्रयाय वौषट् ।

मानस्तोक इत्यस्य कुत्स ऋषिर्जगती छन्दः एको रुद्रो देवता अस्त्रन्यासे वि० ।

ॐ मानस्तोके० अस्त्राय फट् ।

इति षडङ्गन्यासः प्रथमः ।

या ते रुद्रेत्यस्य परमेष्ठी ऋषिरनुष्टुप्छन्दः एको रुद्रो देवता शिखान्यासे वि० ।

ॐ या ते रुद्र शिवा तनूरघोरा० शिखायाम् ।

अस्मिन्महतीत्यस्य परमेष्ठी ऋषिनुरष्टुप्छन्दः बहवो रुद्रा देवताः शिरोन्यासे वि० ।

ॐ अस्मिन्महत्यर्णवेऽन्तरिक्षे० शिरसि ।

असंख्यातेत्यस्य परमेष्ठी ऋषिरनुनुष्टुप् छन्दः बहवो रुद्रा देवताः ललाटन्यासे वि० ।

ॐ असंख्याता सहस्राणि० ललाटे ।

त्र्यम्बकमित्यनयोः क्रमेण वसिष्ठ-प्रजापती ऋषी अनुष्टुप्छन्दः त्र्यम्बको रुद्रो देवता नेत्रन्यासे वि० ।

ॐ त्र्यम्बकं यजामहे० नेत्रयोः ।

मानस्तोक इत्यस्य कुत्स ऋषिर्जगती छन्दः एको रुद्रो देवता नासिकान्यासे वि० ।

ॐ मानस्तोके० नासिकायाम् ।

अवतत्येत्यस्य परमेष्ठी ऋषिरनुष्टुप्छन्दः एको रुद्रो देवता मुखन्यासे वि० ।

ॐ अवतत्य धनुष्ट्वम्० मुखे ।

नीलग्रीवा इति द्वयोः परमेष्ठी ऋषिरनुष्टुप्छन्दः बहवो रुद्रा देवता कण्ठन्यासे वि० ।

ॐ नीलग्रीवाः शितिकण्ठा दिवम्० । ॐ नीलग्रीवाः शितिकण्ठाः शर्वाः० कण्ठे ।

नमस्त ऽआयुधायेत्यस्य परमेष्ठी ऋषिरनुष्टुप् छन्दः एको रुद्रो देवता प्रकोष्ठन्यासे वि० ।

ॐ नमस्त ऽआयुधायानातताय० प्रकोष्ठयोः ।

ये तीर्थानीत्यस्य परमेष्ठी ऋषिरनुष्टुप् छन्दः बहवो रुद्रा देवता हस्तन्यासे वि० ।

ॐ ये तीर्थानि० हस्तयोः ।

नमो वः किरिकेभ्य इत्यस्य परमेष्ठी ऋषिः सामोष्णिग्यजुरुष्णिक् दैवीजगती छन्दांसि बहवो रुद्रा देवता हृदयन्यासे वि० ।

ॐ नमो वः किरिकेभ्यो० हृदये ।

नमो हिरण्यबाहव इत्यस्य परमेष्ठी ऋषिः, अत्रैकादशाक्षराणां यजुस्त्रिष्टुप् छन्दः, अष्टाक्षराणां यजुरनुष्टुप्छन्दः; दशाक्षराणां यजुःपङ्क्तिश्छन्दः, हिरण्यबाह्वाद्यो मन्त्रवर्णावगता उभयतो नमस्कारा बहवो रुद्रा देवता नाभिन्यासे वि० ।

ॐ नमो हिरण्यबाहवे० नाभौ ।

इमा रुद्रायेत्यस्य कुत्स ऋषिर्जगती छन्दः एको रुद्रो देवता गुह्यन्यासे वि० ।

ॐ इमा रुद्राय तवसे० गुह्ये ।

मानो महान्तमित्यस्य कुत्स ऋषिर्जगती छन्दः एको रुद्रो देवता ऊरुन्यासे विनियोगः ।

ॐ मानो महान्तमुत० ऊर्वोः ।

एष त इत्यस्य प्रजापतिर्ऋषिः सामपङ्क्तिर्यजुर्जगती छन्दसी रुद्रो देवता जानुन्यासे वि० ।

ॐ एष ते रुद्रभागः० जान्वोः ।

अवरुद्रमित्यस्य प्रजापतिर्ऋषिः पङ्क्तिश्छन्दः रुद्रो देवता जङ्घान्यासे वि० ।

ॐ अवरुद्रमदीमह्यव० जङ्घयोः ।

अध्यवोचदित्यस्य परमेष्ठी ऋषिः पङ्क्तिश्छन्दः एको रुद्रो देवता कवचन्यासे वि० ।

ॐ अध्यवोचदधिवक्ता० कवचम् ।

नमो बिल्मिन इत्यस्य परमेष्ठी ऋषिः षडक्षराणां यजुर्गायत्री छन्दः पञ्चाक्षरयोर्दैवी पङ्क्तिश्छन्दः सप्ताक्षरस्य यजुरुष्णिक् छन्दः बिल्मिनादयो मन्त्रवर्णावगता अन्यतरतो नमस्कारा बहवो रुद्रा देवता उपकवचन्यासे वि० ।

ॐ नमो बिल्मिने च कवचिने० उपकवचम् ।

नमोऽस्तु नीलग्रीवायेत्यस्य परमेष्ठी ऋषिरनुष्टुप्छन्दः एको रुद्रो देवता तृतीयनेत्रन्यासे वि० ।

ॐ नमोऽस्तु नीलग्रीवाय० तृतीयनेत्रे । (मुष्टितो विमुक्तया मध्यमया) ।

प्रमुञ्चेत्यस्य परमेष्ठी ऋषिरनुष्टुप् छन्दः एको रुद्रो देवता अस्त्रन्यासे वि० ।

ॐ प्रमुञ्च० अस्त्रम् ।

य ऽएतावन्तश्चेत्यस्य परमेष्ठी ऋषिरनुष्टुप् छन्दः बहवो रुद्रा देवता दिग्बन्धने वि० ।

ॐ य ऽएतावन्तश्च० दिग्बन्धः । (तर्जन्यङ्गुष्ठाग्रस्फोटनेन दिग्बन्धः) ।

इति द्वितीयो न्यासः ।

ॐ नमो भगवते रुद्रायेति दशाक्षरमन्त्रस्य प्रजापतिर्ऋषिः विराट् छन्दः रुद्रो देवता न्यासे वि० ।

ॐ नमो मूर्ध्नि । ॐ नं नमो नासिकायाम् । ॐ मों नमः ललाटे । ॐ भं नमः मुखे । ॐ गं नमः कण्ठे । ॐ वं नमः हृदये । ॐ तें नमः दक्षिणहस्ते । ॐ रुं नमः वामहस्ते । ॐ द्रां नमः नाभौ । ॐ यं नमः पादयोः ।

इति रुद्रगायत्रीन्यासस्तृतीयः ।

त्रातारमित्यस्य गर्ग ऋषिस्त्रिष्टुप् छन्दः इन्द्रो देवता प्राच्यां सम्पुटीकरणे नमस्कारे च वि० ।

ॐ त्रातारमिन्द्रम्० इन्द्राय नमः ।

त्वन्नो ऽअग्न इत्यस्य हिरण्यस्तूप आङ्गिरस ऋषिर्जगती छन्दः अग्निर्देवता आग्नेय्यां सम्पुटीकरणे नमस्कारे च वि० ।

ॐ त्वन्नो ऽअग्ने० अग्नये नमः ।

सुगन्नु पन्थामित्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः यमो देवता दक्षिणस्यां सम्पुटीकरणे नमस्कारे च वि० ।

ॐ सुगन्नु पन्थाम्० यमाय नमः ।

असुन्वन्तमित्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः निर्ऋतिर्देवता नैर्ऋत्यां सम्पुटीकरणे नमस्कारे च वि० ।

ॐ असुन्वन्तम० निर्ऋतये नमः ।

तत्त्वा यामीत्यस्य शुनःशेप ऋषिस्त्रिष्टुप्छन्दः वरुणो देवता प्रतीच्यां सम्पुटीकरणे नमस्कारे च वि० ।

ॐ तत्त्वा यामि० वरुणाय नमः ।

आनो नियुद्भिरित्यस्य वसिष्ठ ऋषिस्त्रिष्टुप्छन्दः वायुर्देवता वायव्यां सम्पुटीकरणे नमस्कारे च वि० ।

ॐ आनो नियुद्भिः० वायवे नमः ।

वयठं॰ सोमेत्यस्य बन्धुर्ऋषिर्गायत्रीछन्दः सोमो देवता उदीच्यां सम्पुटीकरणे नमस्कारे च वि॰ ।

ॐ व्वयठं॰ सोम॰ सोमाय नमः ।

तमीशानमित्यस्य गौतम ऋषिर्जगतीछन्दः ईशानो देवता ईशान्यां सम्पुटीकरणे नमस्कारे च वि॰ ।

ॐ तमीशानम्॰ ईशानाय नमः ।

अस्मे रुद्रा इत्यस्य प्रगर्थ ऋषिस्त्रिष्टुप्छन्दः ब्रह्मा देवता ऊर्ध्वायां सम्पुटीकरणे नमस्कारे च वि॰ ।

ॐ अस्मे रुद्रा॰ ब्रह्मणे नमः ।

स्योना पृथिवीत्यस्य मेधातिथिर्ऋषिर्गायत्रीछन्दः अनन्तो देवता अधः सम्पुटीकरणे नमस्कारे च वि॰ ।

ॐ स्योना पृथिवि॰ अनन्ताय नमः ।

इति सम्पुटाख्यो न्यासश्चतुर्थः ।

यज्जाग्रत इति षडर्चस्य सूक्तस्य शिवसङ्कल्प ऋषिस्त्रिष्टुप्छन्दः मनो देवता हृदयन्यासे होमे च वि॰ ।

ॐ यज्जाग्रतो दूरम्० (शु० य० ३४।१—६ मन्त्राः) हृदयाय नमः ।

(मुष्टिविनिर्गताङ्गुष्ठौ सम्पुटौ कृत्वा हृदये न्यसेत्) ।

सहस्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः आद्यानां पञ्चदशानामनुष्टुप्छन्दः यज्ञेन यज्ञमित्यस्य त्रिष्टुप्छन्दः जगद्बीजं पुरुषो देवता शिरोन्यासे होमे च वि० ।

ॐ सहस्रशीर्षा पुरुषः० (शु० य० ३१।१—१६ मन्त्राः) शिरसे स्वाहा ।

(मुष्टिविनिर्गताङ्गुष्ठौ संयुक्तौ न्यस्ततर्जनीकौ कृत्वा शिरसि न्यसेत् ।

अद्भ्यः सम्भृत इति षडर्चस्योत्तरनारायणस्य नारायणपुरुष ऋषिः आद्यानां त्रयाणां त्रिष्टुप्छन्दः चतुर्थ-पञ्चमयोरनुष्टुप्छन्दः षष्ठस्य त्रिष्टुप्छन्दः आदित्यो देवता शिखान्यासे होमे च वि० ।

ॐ अद्भ्यः सम्भृतः० (शु० शु० ३१।१७–२२ मन्त्राः) शिखायै वषट् ।

आशुः शिशान इति द्वादशानामप्रतिरथ ऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता कवचन्यासे होमे च वि० ।

ॐ आशुः शिशानः० (शु० य० १७।३३–४४ मन्त्राः) कवचाय हुम् ।

(इत्यङ्गुष्ठौ प्रसक्ततर्जन्यौ च त्रिकोणवत्कृत्वा मूर्ध्नि पश्चान्मुखं कृत्वोभयपार्श्वतः करौ हृदन्तं नयन् कवचं न्यसेत्) ।

विभ्राडित्यस्य विभ्राट्सौर्य ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता, उदुत्यमिति तिसृणां प्रस्कण्व ऋषिर्गायत्रीछन्दः सूर्यो देवता, तं प्रत्नथेत्यस्य काश्यपवत्सावृषी त्रिष्टुप्छन्दः सोमो देवता, अयं वेन इत्यस्य वेन ऋषिस्त्रिष्टुप्छन्दः सोमो देवता, चित्रमित्यस्य कुत्साङ्गिरस ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता, आन इत्यस्य अगस्त्य ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता, यद्द्येत्यस्य श्रुतकक्षसुतकक्षावृषी गायत्रीछन्दः सूर्यो देवता, तरणिरित्यस्य प्रस्कण्व ऋषिर्गायत्री छन्दः सूर्यो देवता, तत्सूर्यस्येति द्वयोः कुत्स ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता, बण्महानिति द्वयोर्जमदग्निर्ऋषिः आद्यस्य बृहतीछन्दः द्वितीयस्य सतोबृहतीछन्दः सूर्यो देवता, श्रायन्त इवेत्यस्य नृमेध ऋषिर्बृहतीछन्दः सूर्यो देवता, अद्या देवा इत्यस्य कुत्स ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता, आकृष्णेनेत्यस्य हिरण्यस्तूप आङ्गिरस ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता नेत्रन्यासे होमे च वि० ।

ॐ विभ्राड् बृहत्० (शु० य० रुद्राष्टाध्यायी ४।१—१७ मन्त्राः) नेत्रत्रयाय वौषट् ।

नमस्ते इत्यादिषोडशर्चस्य परमेष्ठी ऋषिः, नमस्ते इत्यस्य गायत्रीछन्दः, या ते रुद्रेत्यादीनां त्रयाणामनुष्टुप्छन्दः, अध्यवोचदिति त्रयाणां पङ्क्तिश्छन्दः, नमोऽस्तु नीलग्रीवायेति सप्तानामनुष्टुप्छन्दः, मानो महान्तमिति द्वयोः कुत्स ऋषिर्जगतीछन्दः सर्वेषामेको रुद्रो देवता अस्त्रन्यासे होमे च वि० ।

ॐ नमस्ते० (शु० य० १६।१–१६ मन्त्राः) अस्त्राय फट्।

(किञ्चित्तर्जनीं प्रसार्य मध्यमाङ्गुष्ठयोगेन)

इति बृहत्षडङ्गन्यासः पञ्चमः ।

नमोहिरण्यबाहव इत्यादीनां नमः श्वभ्यः श्वपतिभ्यश्च वो नम इत्यन्तानां यजुषां हिरण्य-बाहुः सेनान्ये दिशां पतिरित्यादिमन्त्रवर्णावगता उभयतो नमस्कारा बहवो रुद्रा देवताः,

नमो भवाय च रुद्राय चेत्यादीनां प्रखिदते चेत्यन्तानां यजुषां भवादयो मन्त्रलिङ्गावगता अन्यतरतो नमस्कारा बहवो रुद्रा देवताः,

नम ऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नम इत्यस्य उभयतो नमस्कारा बहवो रुद्रा देवताः,

नमो वः किरिकेभ्यः इत्यादीनामग्नि-वायु-सूर्य-हृदयभूतव्याहृतीनामन्यतरतो नमस्कारा बहवो रुद्रा देवताः,

द्राप इत्यस्य उपरिष्टाद् बृहतीछन्दः, इमा रुद्राय इत्यस्य कुत्स ऋषिर्जगतीछन्दः,

या ते रुद्रेत्यस्य अनुष्टुप्छन्दः, परि नो मीढुष्टमेति द्वयोस्त्रिष्टुप्छन्दः, विकिरिद्र–सहस्राणीति द्वयोरनुष्टुप्छन्दः सप्तानामेको रुद्रो देवता, असंख्यातेत्यादीनां दशानां यजुषामनुष्टुप्छन्दः बहवो रुद्रा देवताः,

नमोऽस्तु रुद्रेभ्य इत्यादीनां त्रयाणां यजुषां धृतिश्छन्दः बहवो रुद्रा देवता महारुद्रप्रीत्यर्थं होमे वि० ।

ॐ नमस्ते रुद्र मन्यव० अस्त्राय फट् ।

एष ते इत्यस्य प्रजापतिर्ऋषिः सामपङ्क्तिर्यजुर्जगत्यश्छन्दांसि रुद्रो देवता मुद्राप्रदर्शने वि० ।

ॐ एष ते रुद्र भागः० इति योनिमुद्राप्रदर्शनम् ।

व्वयर्ठं० सोमेत्यस्य बन्धुर्ऋषिः सामपङ्क्तिर्यजुर्जगत्यौ छन्दसी रुद्रो देवता, भेषजमित्यस्य प्रजापतिर्ऋषिः ककुप्छन्दः रुद्रो देवता, त्र्यम्बकमित्यनयोः क्रमेण वसिष्ठ–प्रजापती ऋषी-अनुष्टुप्छन्दः त्र्यम्बको रुद्रो देवता, एतत्त इत्यस्य प्रजापतिर्ऋषिः आस्तारपङ्क्तिश्छन्दः रुद्रो देवता, त्र्यायुषमित्यस्य नारायण ऋषिरुष्णिक्छन्दः आशीर्देवता, शिवो नामेत्यस्य प्रजापतिर्ऋषिः प्राजापत्या बृहतीछन्दः क्षुरो देवता, निवर्त्तयामीत्यस्य प्रजापतिर्ऋषिः प्राजापत्या त्रिष्टुप्छन्दः लिङ्गोक्ता देवता महारुद्रप्रीत्यर्थं पाठे वि० ।

ॐ व्वयर्ठं० सोम व्रते० ।

उग्रश्चेत्यस्य प्रजापतिर्ऋषिर्गायत्रीछन्दः मरुतो देवता, अग्निर्ठं० हृदयेनेत्यादीनां यजुषां

प्रजापतिर्ऋषिर्गायत्रीछन्दः लिङ्गोक्ता देवता, आयासायेत्यादीनां प्रजापतिर्ऋषिर्गायत्रीछन्दः लिङ्गोक्ता देवता पाठे वि० ।

ॐ उग्रश्च भीमश्च० ।

वाजश्च मे प्रसवश्च म इत्यादीनां वेट् स्वाहेत्यन्तानां चमकमन्त्राणां देवा ऋषयः छन्दांसि यजूंषि अग्निर्देवता पाठे होमे च वि० ।

ॐ वाजश्च मे० (शु० य० १८।१-२९ मन्त्राः) ।

ऋचं वाचमित्यध्यायस्य दध्यङ्ङाथर्वण ऋषिर्गायत्र्यादीनि छन्दांसि लिङ्गोक्ता देवताः, ऋचं वाचमिति चतुर्णां यजुषां दैवी जगतीछन्दः ऋगादयो लिङ्गोक्ता देवताः, वागोज इत्यस्य यजुर्जगतीछन्दः वागादिलिङ्गोक्ता देवताः, यन्म इत्यस्य पङ्क्तिश्छन्दः बृहस्पतिर्देवता, महाव्याहृतीनां दध्यङ्ङाथर्वण ऋषिर्दैवी गायत्री दैव्युष्णिक् दैवी गायत्रीछन्दांसि अग्निवायुसूर्याः क्रमेण देवताः, तत्सवितुरित्यस्य गायत्रीछन्दः सविता देवता, कया न इति त्र्यर्चस्य द्वयोर्गायत्रीछन्दः तृतीयस्य पादनिचृद्गायत्रीछन्दः इन्द्रो देवता, कया त्वमित्यस्य गायत्रीछन्दः इन्द्रो देवता, इन्द्रो विश्वस्येत्यस्य द्विपदाविराट्छन्दः इन्द्रो देवता, शन्नो मित्रः, शन्नो व्वातः— इति द्वयोरनुष्टुप्छन्दः मित्रावरुणादयो देवताः, अहानि शमित्यस्य द्विपदागायत्रीछन्दः अहानि

रात्रयश्च देवताः, शन्न ऽइन्द्राग्नी इत्यस्य त्रिष्टुप्छन्दः इन्द्राग्नी-इन्द्रावरुणौ इन्द्रापूषणौ इन्द्रासोमौ च देवताः; शन्नो देवीरित्यस्य गायत्रीछन्दः आपो देवताः, स्योना पृथिवीत्यस्य गायत्रीछन्दः पृथिवी देवता, आपो हि ष्ठेति त्र्यर्चस्य गायत्रीछन्दः आपो देवताः, द्यौः शान्तिरित्यस्य शक्करी छन्दः द्यौरादयो देवताः, दृते दृᳬं० हेत्यस्य ब्राह्मी अनुष्टुप् छन्दः आशीर्देवता, दृते दृᳬं० हेत्यस्य उष्णिक्छन्दः आशीर्देवता, नमस्ते हरसे-इत्यस्य बृहतीछन्दः अग्निर्देवता, नमस्ते ऽअस्तु-यतोयतः इत्यनयोरनुष्टुप्छन्दः विद्युत्स्तनयित्नुर्भगवान् महावीरश्च क्रमेण देवताः, सुमित्रिया न इत्यस्य प्राजापत्या जगतीछन्दः आपो देवताः, तच्चक्षुरित्यस्य पुर उष्णिक् छन्दः सूर्यो देवता शान्तिकरणे होमे च वि० ।

ॐ ऋचं वाचम्० (शु० य० ३६।१–२४ मन्त्राः) ।

ध्यानम्—ॐ शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् ।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥ १ ॥
नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् ।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥ २ ॥

कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम् ।
ज्वलन्तं पिङ्गलजटाजूटमुद्योतकारिणम् ॥ ३ ॥
अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम् ।
दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥ ४ ॥
दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ ५ ॥
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ।
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥ ६ ॥

इति महारुद्रन्यासविधिः ।

॥ श्रीः ॥

अथ रुद्रयागहवनमन्त्रविधिः

एकषष्ट्युत्तरशतधाविभागपक्षमाश्रित्य

रुद्रस्वाहाकारविधिः

ॐ गणानान्त्वा० स्वाहा ।

ॐ अम्बेऽ अम्बिके० स्वाहा । इति हुत्वा,

ॐ यज्जाग्रतः० (६ मन्त्राः) स्वाहा ।

ॐ सहस्रशीर्षा० (१६ मन्त्राः) स्वाहा ।

ॐ अद्भ्यः सम्भृतः० (६ मन्त्राः) स्वाहा ।

ॐ आशुः शिशानः० (१२ मन्त्राः) स्वाहा ।

ॐ विभ्राड् बृहत्पिबतु० (१७ मन्त्राः) स्वाहा ।

ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ नमस्ते रुद्र मन्न्यवऽ उतो तऽ इषवे नमः । बाहुभ्यामुत ते नमः स्वाहा ॥ १ ॥

ॐ सा ते रुद्र शिवा तनूरघोरापापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि स्वाहा ॥ २ ॥

ॐ यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवाङ्गिरित्रताङ्कुरु मा हिᳬसीः पुरुषञ्जगत् स्वाहा ॥ ३ ॥

ॐ शिवेन व्वचसा त्त्वा गिरिशाच्छा व्वदामसि। यथा नः सर्व्वमिज्जगदयक्ष्मᳬसुमना ऽ असत् स्वाहा ॥ ४ ॥

ॐ अद्ध्यवोचदधिवक्ता प्प्रथमो दैव्व्यो भिषक्। अहींश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्च यातुधान्न्योऽधराचीः परासुव स्वाहा ॥ ५ ॥

ॐ असौ यस्ताम्म्रोऽ अरुण ऽउत बब्भ्रुः सुमङ्गलः। ये चैनᳬरुद्द्राऽ अभितो दिक्षु श्रिताः सहस्रशो वैषाᳬहेडऽ ईमहे स्वाहा ॥ ६ ॥

ॐ असौ योऽवसर्प्पति नीलग्ग्रीवो व्विलोहितः। उतैनङ्गोपाऽ अदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सः दृष्ट्टो मृडयाति नः स्वाहा ॥ ७ ॥

ॐ नमोऽस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढुषे। अथो येऽ अस्य सत्त्वानो हन्तेब्भ्योऽकरन्नमः स्वाहा ॥ ८ ॥

ॐ प्रमुञ्च धन्न्वनस्त्वमुभयोरार्त्क्न्योर्ज्ज्याम्। याश्च ते हस्तऽ इषवः परा ता भगवो व्वप स्वाहा ॥ ९ ॥

ॐ विज्ज्यन्धनुः कपर्द्दिनो व्विशल्ल्यो बाणवाँ२ऽ उत। अनेशन्नस्य याऽ इषवऽ आभुरस्य निषङ्गधिः स्वाहा ॥ १० ॥

ॐ या ते हेतिर्म्मीढुष्ट्टम हस्ते बभूव ते धनुः। तयास्म्मान्न्विश्श्वतस्त्वमयक्ष्मया परिभुज स्वाहा ॥ ११ ॥

ॐ परि ते धन्न्वनो हेतिरस्मान्न्वृणक्तु व्विश्श्वतः। अथो यऽ इषुधिस्तवारेऽ अस्मन्निधेहि तम् स्वाहा ॥ १२ ॥

ॐ अवतत्त्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे। निशीर्य्य शल्ल्यानां मुखा शिवो नः सुमना भव स्वाहा ॥ १३ ॥

ॐ नमस्तऽ आयुधायानातताय धृष्ण्णवे। उभाब्भ्यामुत ते नमो बाहुब्भ्यान्तव धन्न्वने स्वाहा ॥ १४ ॥

ॐ मा नो महान्तमुत मा नोऽ अर्ब्भकम्मा नऽ उक्षन्तमुत मा नऽ उक्षि-

तम् । मा नो व्वधीः पितरम्मोत मातरम्मा नः प्प्रियास्तन्न्वो रुद्र रीरिषः स्वाहा ॥ १५ ॥

ॐ मा नस्तोके तनये मा नऽ आयुषि मा नो गोषु मा नोऽ अश्श्वेषु रीरिषः। मा नो व्वीरान् रुद्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे स्वाहा ॥१६॥

ॐनमो हिरण्यबाहवे सेनान्न्ये दिशाञ्च पतये नमः स्वाहा ॥ १७ ॥

ॐनमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः पशूनाम्पतये नमः स्वाहा ॥ १८ ॥

ॐनमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमः स्वाहा ॥ १९ ॥

ॐनमो हरिकेशायोपवीतिने पुष्टानाम्पतये 'नमः स्वाहा ॥ २० ॥

ॐनमो बब्भ्लुशाय व्व्याधिनेन्नानाम्पतये नमः स्वाहा ॥ २१ ॥

ॐनमो भवस्य हेत्त्यै जगताम्पतये नमः स्वाहा ॥ २२ ॥

ॐनमो रुद्रायाततायिने क्षेत्राणाम्पतये नमः स्वाहा ॥ २३ ॥

ॐनमः सूतायाहन्त्यै व्वनानाम्पतये नमः स्वाहा ॥ २४ ॥

ॐनमो रोहिताय स्त्थपतये व्वृक्षाणाम्पतये नमः स्वाहा ॥ २५ ॥

ॐनमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमः स्वाहा ॥ २६ ॥
ॐनमो मन्त्रिणे वाणिजाय कक्षाणाम्पतये नमः स्वाहा ॥ २७ ॥
ॐनमऽ उच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमः स्वाहा ॥ २८ ॥
ॐनमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमः स्वाहा ॥ २९ ॥
ॐनमः सहमानाय निव्याधिनऽ आव्याधिनीनाम्पतये नमः स्वाहा ॥३०॥
ॐनमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमः स्वाहा ॥ ३१ ॥
ॐनमो निचेरवे परिचरायारण्यानाम्पतये नमः स्वाहा ॥ ३२ ॥
ॐनमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमः स्वाहा ॥ ३३ ॥
ॐनमो निषङ्गिणऽ इषुधिमते तस्कराणाम्पतये नमः स्वाहा ॥ ३४ ॥
ॐनमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णताम्पतये नमः स्वाहा ॥३५॥
ॐनमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः स्वाहा ॥३६॥
ॐनमऽ उष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमः स्वाहा ॥ ३७ ॥
ॐनमऽ इषुमद्भ्यो धन्वायिभ्यश्च वो नमः स्वाहा ॥ ३८ ॥

ॐ नमऽ आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमः स्वाहा ॥ ३९ ॥
ॐ नमऽ आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः स्वाहा ॥ ४० ॥
ॐ नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमः स्वाहा ॥ ४१ ॥
ॐ नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः स्वाहा ॥ ४२ ॥
ॐ नमः शयानेभ्यऽ आसीनेभ्यश्च वो नमः स्वाहा ॥ ४३ ॥
ॐ नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः स्वाहा ॥ ४४ ॥
ॐ नमः सभाभ्यः सभापतिभ्यश्च वो नमः स्वाहा ॥ ४५ ॥
ॐ नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः स्वाहा ॥ ४६ ॥
ॐ नमऽ आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमः स्वाहा ॥ ४७ ॥
ॐ नमऽ उगणाभ्यस्तृंहतीभ्यश्च वो नमः स्वाहा ॥ ४८ ॥
ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमः स्वाहा ॥ ४९ ॥
ॐ नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः स्वाहा ॥ ५० ॥
ॐ नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमः स्वाहा ॥ ५१ ॥

ॐ नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः स्वाहा ॥ ५२ ॥
ॐ नमः सेनाभ्यः सेनानिभ्यश्च वो नमः स्वाहा ॥ ५३ ॥
ॐ नमो रथिभ्योऽ अरथेभ्यश्च वो नमः स्वाहा ॥ ५४ ॥
ॐ नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमः स्वाहा ॥ ५५ ॥
ॐ नमो महद्भ्योऽ अर्भकेभ्यश्च वो नमः स्वाहा ॥ ५६ ॥
ॐ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः स्वाहा ॥ ५७ ॥
ॐ नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः स्वाहा ॥ ५८ ॥
ॐ नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमः स्वाहा ॥ ५९ ॥
ॐ नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः स्वाहा ॥ ६० ॥
ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमः स्वाहा ॥ ६१ ॥
ॐ नमो भवाय च रुद्राय च स्वाहा ॥ ६२ ॥
ॐ नमः शर्वाय च पशुपतये च स्वाहा ॥ ६३ ॥
ॐ नमो नीलग्रीवाय च शितिकण्ठाय च स्वाहा ॥ ६४ ॥

ॐ नमः कपर्द्दिने च व्युप्तकेशाय च स्वाहा ॥ ६५ ॥
ॐ नमः सहस्राक्षाय च शतधन्वने च स्वाहा ॥ ६६ ॥
ॐ नमो गिरिशयाय च शिपिविष्टाय च स्वाहा ॥ ६७ ॥
ॐ नमो मीढुष्टमाय चेषुमते च स्वाहा ॥ ६८ ॥
ॐ नमो ह्रस्वाय च वामनाय च स्वाहा ॥ ६९ ॥
ॐ नमो बृहते च वर्षीयसे च स्वाहा ॥ ७० ॥
ॐ नमो वृद्धाय च सवृधे च स्वाहा ॥ ७१ ॥
ॐ नमोऽग्र्याय च प्रथमाय च स्वाहा ॥ ७२ ॥
ॐ नमऽ आशवे चाजिराय च स्वाहा ॥ ७३ ॥
ॐ नमः शीघ्र्याय च शीभ्याय च स्वाहा ॥ ७४ ॥
ॐ नमऽ ऊर्म्म्याय चावस्वन्याय च स्वाहा ॥ ७५ ॥
ॐ नमो नादेयाय च द्वीप्याय च स्वाहा ॥ ७६ ॥
ॐ नमो ज्ज्येष्ठाय च कनिष्ठाय च स्वाहा ॥ ७७ ॥

ॐनमः पूर्व्वजाय चापरजाय च स्वाहा ॥ ७८ ॥
ॐनमो मदूध्यमाय चापगल्भाय च स्वाहा ॥ ७९ ॥
ॐनमो जघन्न्याय च बुद्धूध्न्याय च स्वाहा ॥ ८० ॥
ॐनमः सोब्भ्याय च प्प्रतिसर्य्याय च स्वाहा ॥ ८१ ॥
ॐनमो याम्म्याय च क्षेम्म्याय च स्वाहा ॥ ८२ ॥
ॐनमः श्श्लोक्क्याय चावसान्न्याय च स्वाहा ॥ ८३ ॥
ॐनमऽ उर्व्वर्य्याय च खल्ल्याय च स्वाहा ॥ ८४ ॥
ॐनमो व्वन्न्याय च कक्क्ष्याय च स्वाहा ॥ ८५ ॥
ॐनमः श्श्रवाय च प्प्रतिश्श्रवाय च स्वाहा ॥ ८६ ॥
ॐनमऽ आशुषेणाय चाशुरथाय च स्वाहा ॥ ८७ ॥
ॐनमः शूराय चावभेदिने च स्वाहा ॥ ८८ ॥
ॐनमो बिल्मिने च कवचिने च स्वाहा ॥ ८९ ॥
ॐनमो व्वर्म्मिणे च व्वरूथिने च स्वाहा ॥ ९० ॥

ॐ नमः श्रुताय च श्रुतसेनाय च स्वाहा ॥ ९१ ॥
ॐ नमो दुन्दुभ्याय चाहनन्याय च स्वाहा ॥ ९२ ॥
ॐ नमो धृष्णवे च प्रमृशाय च स्वाहा ॥ ९३ ॥
ॐ नमो निषङ्गिणे चेषुधिमते च स्वाहा ॥ ९४ ॥
ॐ नमस्तीक्ष्णेषवे चायुधिने च स्वाहा ॥ ९५ ॥
ॐ नमः स्वायुधाय च सुधन्वने च स्वाहा ॥ ९६ ॥
ॐ नमः स्रुत्याय च पथ्याय च स्वाहा ॥ ९७ ॥
ॐ नमः काट्याय च नीप्याय च स्वाहा ॥ ९८ ॥
ॐ नमः कुल्याय च सरस्याय च स्वाहा ॥ ९९ ॥
ॐ नमो नादेयाय च वैशन्ताय च स्वाहा ॥ १०० ॥
ॐ नमः कूप्याय चावट्याय च स्वाहा ॥ १०१ ॥
ॐ नमो वीध्र्याय चातप्याय च स्वाहा ॥ १०२ ॥
ॐ नमो मेघ्याय च विद्युत्याय च स्वाहा ॥ १०३ ॥

ॐ नमो व्वष्यीय चावष्यीय च स्वाहा ॥ १०४ ॥
ॐ नमो व्वात्याय च रेष्म्याय च स्वाहा ॥ १०५ ॥
ॐ नमो व्वास्तव्याय च व्वास्तुपाय च स्वाहा ॥ १०६ ॥
ॐ नमः सोमाय च रुद्राय च स्वाहा ॥ १०७ ॥
ॐ नमस्ताम्म्राय चारुणाय च स्वाहा ॥ १०८ ॥
ॐ नमः शङ्गवे च पशुपतये च स्वाहा ॥ १०९ ॥
ॐ नमऽ उग्ग्राय च भीमाय च स्वाहा ॥ ११० ॥
ॐ नमोऽग्ग्रेवधाय च दूरेवधाय च स्वाहा ॥ १११ ॥
ॐ नमो हन्त्रे च हनीयसे च स्वाहा ॥ ११२ ॥
ॐ नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः स्वाहा ॥ ११३ ॥
ॐ नमस्ताराय स्वाहा ॥ ११४ ॥
ॐ नमः शम्भवाय च मयोभवाय च स्वाहा ॥ ११५ ॥
ॐ नमः शङ्कराय च मयस्कराय च स्वाहा ॥ ११६ ॥

ॐनमः शिवाय च शिवतराय च स्वाहा ॥ ११७ ॥
ॐनमः पार्य्याय चावार्य्याय च स्वाहा ॥ ११८ ॥
ॐनमः प्प्रतरणाय चोत्तरणाय च स्वाहा ॥ ११९ ॥
ॐनमस्तीर्त्थ्याय च कूल्ल्याय च स्वाहा ॥ १२० ॥
ॐनमः शष्प्याय च फेन्न्याय च स्वाहा ॥ १२१ ॥
ॐनमः सिकत्त्याय च प्प्रवाह्याय च स्वाहा ॥ १२२ ॥
ॐनमः किर्ठ० शिलाय च क्षयणाय च स्वाहा ॥ १२३ ॥
ॐनमः कपर्द्दिने च पुलस्तये च स्वाहा ॥ १२४ ॥
ॐनमऽ इरिण्ण्याय च प्प्रपत्थ्याय च स्वाहा ॥ १२५ ॥
ॐनमो व्व्रज्ज्याय च गोष्ट्ठ्याय च स्वाहा ॥ १२६ ॥
ॐनमस्तल्प्याय च गेह्याय च स्वाहा ॥ १२७ ॥
ॐनमो हृदय्याय च निवेष्प्याय च स्वाहा ॥ १२८ ॥
ॐनमः काट्ट्याय च गह्वरेष्ट्ठाय च स्वाहा ॥ १२९ ॥

ॐ नमः शुष्क्याय च हरित्याय च स्वाहा ॥ १३० ॥
ॐ नमः पांसव्याय च रजस्याय च स्वाहा ॥ १३१ ॥
ॐ नमो लोप्याय चोलप्याय च स्वाहा ॥ १३२ ॥
ॐ नमऽ ऊर्व्याय च सूर्व्याय च स्वाहा ॥१३३ ॥
ॐ नमः पर्ण्णाय च पर्ण्णशदाय च स्वाहा ॥ १३४ ॥
ॐ नमऽ उद्गुरमाणाय चाभिघ्नते च स्वाहा ॥ १३५ ॥
ॐ नमऽ आखिदते च प्प्रखिदते च स्वाहा ॥ १३६ ॥
ॐ नमऽ इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः स्वाहा ॥ १३७ ॥
ॐ नमो वः किरिकेभ्यो देवानाᳬं हृदयेभ्यः स्वाहा ॥ १३८ ॥
ॐ नमो विचिन्वत्केभ्यो देवानाᳬं हृदयेभ्यः स्वाहा ॥ १३९ ॥
ॐ नमो विक्षिणत्केभ्यो देवानाᳬं हृदयेभ्यः स्वाहा ॥१४० ॥
ॐ नमऽ आनिर्हतेभ्यो देवानाᳬं हृदयेभ्यः स्वाहा ॥ १४१ ॥
ॐ द्रापेऽ अन्धसस्प्पते दरिद्र नीललोहित । आसाम्प्रजाना-

मेषाम्पशूनाम्मा भेम्मा रोङ् मो च नः किञ्चनाममत् स्वाहा ॥ १४२ ॥

ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्प्रभरामहे मतीः ।
यथा शमसद् द्विपदे चतुष्ष्पदे व्विश्श्वम्पुष्टं ग्रामेऽ
अस्मिन्ननातुरम् स्वाहा ॥ १४३ ॥

ॐ या ते रुद्र शिवा तनूः शिवा व्विश्श्वाहा भेषजी ।
शिवा रुतस्य भेषजी तया नो मृढ जीवसे स्वाहा ॥ १४४ ॥

ॐ परि नो रुद्रस्य हेतिर्व्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः ।
अव स्त्थिरा मघवद्भ्यस्तनुष्ष्व मीढ्वस्तोकाय तनयाय
मृड स्वाहा ॥ १४५ ॥

ॐ मीढुष्टम शिवतम शिवो नः सुमना भव । परमे व्वृक्षऽ आयुध-
न्निधाय कृत्तिं व्वसानऽ आचर पिनाकम्बिभ्भ्रदागहि स्वाहा ॥ १४६ ॥

ॐ व्विकिरिद्र व्विलोहित नमस्तेऽ अस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोऽन्न्यमस्म्मन्निवपन्तु ताः स्वाहा ॥ १४७ ॥

ॐ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि स्वाहा ॥ १४८ ॥
ॐ असङ्ख्याता सहस्राणि ये रुद्द्राऽ अधि भूम्म्याम् ।
तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १४९ ॥
ॐ अस्म्मिन्न्महत्यर्ण्णवेऽन्तरिक्षे भवाऽ अधि ।
तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १५० ॥
ॐ नीलग्ग्रीवाः शितिकण्ठाः दिवᳬ रुद्द्राऽ उपश्श्रिताः ।
तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १५१ ॥
ॐ नीलग्ग्रीवाः शितिकण्ठाः शर्व्वाऽ अधः क्षमाचराः ।
तेषाᳬ सहस्रयोजऽनेव धन्न्वानि तन्न्मसि स्वाहा ॥ १५२ ॥
ॐ ये व्वृक्षेषु शष्प्पिञ्जरा नीलग्ग्रीवा व्विलोहिताः ।
तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १५३ ॥
ॐ ये भूतानामधिपतयो व्विशिखासः कपर्द्दिनः ।

तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १५४ ॥

ॐ ये पथाम्पथिरक्षयऽ ऐलबृदाऽ आयुर्य्युधः ।

तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १५५ ॥

ॐ ये तीर्त्थानि प्प्रचरन्ति सृकाहस्ता निषङ्गिणः ।

तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १५६ ॥

ॐ येऽन्नेषु व्विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।

तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १५७ ॥

ॐ यऽ एतावन्तश्च भूयाᳬसश्च दिशो रुद्रा व्वितस्त्थिरे ।

तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १५८ ॥

ॐ नमोऽस्तु रुद्रेब्भ्यो ये दिवि येषां व्वर्षमिषवः । तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः । तेब्भ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा ॥ १५९ ॥

ॐ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां व्वातऽ इषवः । तेभ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोदूर्ध्वाः । तेभ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा ॥ १६० ॥

ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्व्यां येषामन्नमिषवः । तेभ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोदूर्ध्वाः । तेभ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा ॥ १६१ ॥

ॐभूः, ॐभुवः, ॐस्वः । ॐव्वयर्ठं० सोम० (८ मन्त्राः) [पाठमात्रम्] ।

ॐउग्रश्च० (७ मन्त्राः) [पाठमात्रम्] ।

ॐव्वाजश्च० ॥ १ ॥ प्प्राणश्च० ॥ २ ॥ ओजश्च० ॥ ३ ॥ ज्यैष्ठ्यं च० ॥४॥ स्वाहा ।

२–ॐनमस्ते० (१६१ आहुतयः) ।

ॐ सत्यञ्च० ॥१॥ ऋतञ्च० ॥२॥ मन्ता च० ॥३॥ शञ्च० ॥४॥ स्वाहा ।

३–ॐ नमस्ते० (१६१ आहुतयः) ।

ॐ ऊर्क् च० ॥१॥ रयिश्च० ॥२॥ वित्तञ्च० ॥३॥ व्व्रीहयश्च ॥४॥ स्वाहा ।

४–ॐ नमस्ते० (१६१ आहुतयः) ।

ॐ अश्मा च० ॥ १ ॥ अग्निश्च० ॥ २ ॥ व्वसु च० ॥ ३ ॥ स्वाहा ।

५–ॐ नमस्ते० (१६१ आहुतयः) ।

ॐ अग्निश्च मऽ इन्द्रश्च० ॥१॥ मित्रश्च० ॥२॥ पृथिवी च० ॥३॥ स्वाहा ।

६–ॐ नमस्ते० (१६१ आहुतयः) ।

ॐ अꣳशुश्च० ॥१॥ आग्रयणश्च० ॥२॥ स्रुचश्च० ॥३॥ स्वाहा ।

७–ॐ नमस्ते० (१६१ आहुतयः) ।

ॐ अग्निश्च० ॥१॥ व्रतञ्च० ॥२॥ स्वाहा ।

८–ॐ नमस्ते० (१६१ आहुतयः) ।

ॐ एका च० ॥१॥ स्वाहा ।

९–ॐनमस्ते० (१६१ आहुतयः)।

ॐचतस्रश्च० ॥१॥ स्वाहा।

१०–ॐनमस्ते० (१६१ आहुतयः)।

ॐयविश्च० ॥१॥ पष्ठवाट् च० ॥२॥ स्वाहा।

(पुनः) ॐयज्जाग्रतः० (६ मन्त्राः) स्वाहा।

ॐसहस्रशीर्षा० (१६ मन्त्राः) स्वाहा।

ॐअद्भ्यः सम्भृतः० (६ मन्त्राः) स्वाहा।

ॐआशुः शिशानः० (१२ मन्त्राः) स्वाहा।

ॐविभ्राड् बृहत् पिबतु० (१७ मन्त्राः) स्वाहा।

११–ॐनमस्ते० (१६१ आहुतयः)।

ॐवाजाय स्वाहा० ॥ १ ॥ आयुर्यज्ञेन कल्पताम्० ॥ २ ॥ स्वाहा।

ॐऋचं वाचम्० स्वाहा। ॐयन्मे छिद्रम्० स्वाहा।

ॐभूर्भुवः स्वः तत्सवितुः० स्वाहा। ॐकयानश्चित्रः० स्वाहा।

ॐकस्त्वा सत्यो मदानाम्० स्वाहा। ॐअभी षु णः० स्वाहा।
ॐकया त्वन्नऽ ऊत्याभि० स्वाहा। ॐइन्द्रो व्विश्वस्य० स्वाहा।
ॐशं नो मित्रः शं वरुणः० स्वाहा। ॐशं नो व्वातः पवताᳬं शं नः० स्वाहा।
ॐअहानि शं भवन्तु नः० स्वाहा। ॐशन्नो देवीः० स्वाहा।
ॐस्योना पृथिवि० स्वाहा। ॐआपो हि ष्ठा० स्वाहा।
ॐयो वः शिवतमो रसः० स्वाहा। ॐतस्माऽ अरं गमाम वः० स्वाहा।
ॐद्यौः शान्तिः० स्वाहा। ॐदृते दृᳬह मा मित्रस्य मा चक्षुषा० स्वाहा।
ॐदृते दृᳬह मा ज्योक्ते० स्वाहा। ॐनमस्ते हरसे शोचिषे० स्वाहा।
ॐनमस्तेऽ अस्तु व्विद्युते० स्वाहा। ॐयतो-यतः समीहसे० स्वाहा।
ॐसुमित्रिया नऽ आपः० स्वाहा। ॐतच्चक्षुर्देवहितम्० स्वाहा।
ॐसद्योजातम्० (५ मन्त्राः) [पाठमात्रम्]।

ततः षडङ्गन्यासं कुर्यादिति।

इति रुद्रयागहवनमन्त्रविधिः।

(१) अथ [१]रुद्रयागस्य षड्भिः प्रकारैर्हवनमन्त्रविभागस्तत्र एकधाहवनमन्त्रविभागपक्षः प्रथमः ।

ॐ नमस्ते रुद्र मन्यव इत्यारभ्य तमेषाञ्जम्भे दध्मः स्वाहा ॥

इति षट्षष्ठिमन्त्राणामेकाहुतिः ॥ १ ॥

(२) अथ त्रेधाहवनमन्त्रविभागपक्षः द्वितीयः ।

ॐ नमस्ते रुद्र मन्यव इत्यारभ्य अर्भकेभ्यश्च वो नमः स्वाहा ॥

इति षड्विंशतिमन्त्राणामेकाहुतिः ॥ १ ॥

ॐ नमस्तक्षभ्य इत्यारभ्य सुधन्वने च स्वाहा ॥

इति दशमन्त्राणामेकाहुतिः ॥ २ ॥

ॐ नमः स्रुत्यायेत्यारभ्य तमेषाञ्जम्भे दध्मः स्वाहा ॥

इति त्रिंशन्मन्त्राणामेकाहुतिः ॥ ३ ॥

---

१. रुद्रयागे सर्वत्र रौद्राध्यायस्यार्षेयादिकं स्मृत्वा 'श्रीमहारुद्रप्रीतये होमे विनियोगः' इति कथनीयम्।

(३) अथ षोढा (षडधा) हवनमन्त्रविभागपक्षस्तृतीयः ।

ॐ नमस्ते रुद्र मन्यव इत्यारभ्य अर्भकेभ्यश्च वो नमः स्वाहा ॥
इति षड्विंशतिमन्त्राणामेकाहुतिः ॥ १ ॥

ॐ नमस्तक्षभ्य इत्यारभ्य सुधन्वने च स्वाहा ॥
इति दशमन्त्राणामेकाहुतिः ॥ २ ॥

ॐ नमः स्रुत्यायेत्यारभ्य यऽ एतावन्तश्च० मसि स्वाहा ॥
इति सप्तविंशतिमन्त्राणामेकाहुतिः ॥ ३ ॥

ॐ नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः । तेभ्यो दश प्राची० तमेषाञ्जम्भे दध्मः स्वाहा ॥ ४ ॥

ॐ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वातऽ इषवः । तेभ्यो दश प्राची० तमेषाञ्जम्भे दध्मः स्वाहा ॥ ५ ॥

ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः । तेभ्यो दश प्राची० तमेषाञ्जम्भे दध्मः स्वाहा ॥ ६ ॥

(४) अथ षोडशधा हवनमन्त्रविभागपक्षश्चतुर्थः ।

ॐ नमस्ते रुद्र मन्यव इत्यारभ्य अर्भकेभ्यश्च वो नमः स्वाहा ॥
इति षड्विंशतिमन्त्राणामेकाहुतिः ॥ १ ॥

ॐ नमस्तक्षभ्य इत्यारभ्य सुधन्वने च स्वाहा ।
इति दशमन्त्राणामेकाहुतिः ॥ २ ॥

ॐ नमः स्रुत्यायेत्यारभ्य पराचीना मुखा कृधि स्वाहा ।
इति सप्तदशमन्त्राणामेकाहुतिः ॥ ३ ॥

ॐ असङ्ख्याता सहस्राणि ये रुद्राऽ अधि भूम्याम् ।
तेषाᳬं सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ ४ ॥

ॐ अस्मिन्न्महत्त्यर्णवेऽन्तरिक्षे भवाऽ अधि ।
तेषाᳬं सहस्रयोजऽनेव धन्न्वानि तन्न्मसि स्वाहा ॥ ५ ॥

ॐ नीलग्ग्रीवाः शितिकण्ठा दिवᳬं रुद्राऽ उपश्रिताः ।
तेषाᳬं सहस्रयोजनेऽव धन्वानि तन्न्मसि स्वाहा ॥ ६ ॥

ॐ नीलग्ग्रीवाः शितिकण्ठाः शर्व्वाऽ अधः क्षमाचराः ।
तेषाᳪ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ ७ ॥
ॐ ये व्वृक्षेषु शष्पिञ्जरा नीलग्ग्रीवा व्विलोहिताः ।
तेषाᳪ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ ८ ॥
ॐ ये भूतानामधिपतयो व्विशिखासः कपर्द्दिनः ।
तेषाᳪ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ ९ ॥
ॐ ये पथां पथिरक्षयऽ ऐलबृदाऽ आयुर्य्युधः ।
तेषाᳪ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १० ॥
ॐ ये तीर्त्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषाᳪ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ ११ ॥
ॐ येऽन्नेषु व्विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाᳪ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १२ ॥
ॐ यऽ एतावन्तश्च भूयाᳪसश्श्च दिशो रुद्रा व्वितस्थिरे ।

तेषाᳬ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि स्वाहा ॥ १३ ॥
ॐ नमोऽस्तु रुद्रेभ्यो ये दिवि येषां व्वर्षमिषवः । तेभ्यो दश प्राचीर्दश० ।
तेभ्यो नमोऽ अस्तु तेनोऽवन्तु तेनो० तमेषां जम्भे दध्मः स्वाहा ॥ १४ ॥
ॐ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां व्वातऽ इषवः । तेभ्यो दश प्राचीर्द्दश० ।
तेभ्यो नमोऽ अस्तु तेनोऽवन्तु तेनो० तमेषां जम्भे दध्मः स्वाहा ॥ १५ ॥
ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्व्यां येषामन्नमिषवः । तेभ्यो दश प्राचीर्द्दश० ।
तेभ्यो नमोऽ अस्तु तेनोऽवन्तु तेनो० तमेषां जम्भे दध्मः स्वाहा ॥ १६ ॥

(५) अथ चतुश्चत्वारिंशद्धवनमन्त्रविभागपक्षः पञ्चमः ।

ॐ नमस्ते रुद्र मन्यव० मुत ते नमः स्वाहा ॥ १ ॥
ॐ या ते रुद्र शिवा० भि चाकशीहि स्वाहा ॥ २ ॥
ॐ यामिषुङ्गिरिशन्त० पुरुषञ्जगत् स्वाहा ॥ ३ ॥
ॐ शिवेन व्वचसा० सुमनाऽ असत् स्वाहा ॥ ४ ॥

ॐ अदूध्यवोचदधिवक्ता० परासुव स्वाहा ॥ ५ ॥
ॐ असौ यस्ताम्रो० ईमहे स्वाहा ॥ ६ ॥
ॐ असौ योऽवसर्प्पति० उतैनं गोपा० मृडयाति नः स्वाहा ॥ ७ ॥
ॐ नमोऽस्तु नीलग्ग्रीवाय सहस्राक्षाय० तेभ्योऽकरन्नमः स्वाहा ॥ ८ ॥
ॐ प्रमुञ्च धन्वनस्त्वमुभयो० भगवो व्वप स्वाहा ॥ ९ ॥
ॐ व्विज्ज्यं धनुः कपर्द्दिनो० निषङ्गधिः स्वाहा ॥ १० ॥
ॐ या ते हेतिर्म्मीढुष्टम हस्ते० परिभुज स्वाहा ॥ ११ ॥
ॐ परि ते धन्न्वनो हेति० निधेहि तम् स्वाहा ॥ १२ ॥
ॐ अवतत्य धनुष्ट्वꣳ सहस्राक्ष० सुमना भव स्वाहा ॥ १३ ॥
ॐ नमस्तऽ आयुधाया० धन्न्वने स्वाहा ॥ १४ ॥
ॐ मा नो महान्तमुत० रीरिषः स्वाहा ॥ १५ ॥
ॐ मा नस्तोके० हवामहे स्वाहा ॥ १६ ॥
ॐ नमो हिरण्यबाहवे० स्वाहा । ॐ नमो बभ्लुशाय० । ॐ नमो रोहि-

ताय० स्वाहा। ॐ नमः कृत्स्नायतया० स्वाहा। ॐ नमो ञ्वञ्चते० ञ्विकृन्तानाम्पतये नमः स्वाहा।

इति पञ्चमन्त्राणामेकाहुतिः ॥ १७ ॥

ॐ नमऽ उष्णीषिणे० स्वाहा। ॐ नमो ञ्विसृजद्भ्यो० स्वाहा। ॐ नमः सभाभ्यः० स्वाहा। ॐ नमो गणेभ्यो० स्वाहा। ॐ नमः सेनाभ्यः० अर्भकेभ्यश्च वो नमः स्वाहा।

इति पञ्चमन्त्राणामेकाहुतिः ॥ १८ ॥

ॐ नमस्तक्षभ्यो० स्वाहा। ॐ नमः श्वभ्यः० स्वाहा। ॐ नमः कपर्दिने० स्वाहा। ॐ नमो ह्रस्वाय० स्वाहा। ॐ नमऽ आशवे० स्वाहा।

इति पञ्चमन्त्राणामेकाहुति ॥ १९ ॥

ॐ नमो ज्ज्येष्ठाय० स्वाहा। ॐ नमः सोभ्याय० स्वाहा। ॐ नमो ञ्वन्न्याय० स्वाहा। ॐ नमो बिल्मिने० स्वाहा। ॐ नमो धृष्णवे०

इति पञ्चमन्त्राणामेकाहुतिः ॥ २० ॥

ॐ नमः स्रुत्याय॰ स्वाहा। ॐ नमः कूप्याय॰ स्वाहा। ॐ नमो व्वा-
त्याय॰ स्वाहा। ॐ नमः शङ्गवे॰ नमस्ताराय स्वाहा।
इति मन्त्रचतुष्टयस्यैकाहुतिः ॥ २१ ॥

ॐ नमः शम्भवाय॰ शिवतराय च स्वाहा ॥ २२ ॥

ॐ नमः पार्य्याय॰ स्वाहा। ॐ नमः सिकत्याय॰ स्वाहा। ॐ नमो व्व्र-
ज्याय॰ स्वाहा। ॐ नमः शुष्क्याय॰ स्वाहा। ॐ नमः पर्ण्णाय॰
आनिर्हतेभ्यः स्वाहा।
इति पञ्चमन्त्राणामेकाहुतिः ॥ २३ ॥

ॐ नमो वः किरिकेभ्यो देवानाᳬ हृदयेभ्यो नमो व्विचिन्न्वत्केभ्यो नमो
व्विक्षिणत्केभ्यो नमऽ आनिर्हतेभ्यः स्वाहा ॥ २४ ॥

ॐ द्रापेऽ अन्धसस्पते॰ किं चनाममत् स्वाहा ॥ २५ ॥

ॐ इमा रुद्राय तवसे॰ अस्मिन्ननातुरम् स्वाहा ॥ २६ ॥

ॐ या ते रुद्र शिवा तनूः शिवा॰ मृड जीवसे स्वाहा २७ ॥

ॐ परि नो रुद्रस्य० तनयाय मृड स्वाहा ॥ २८ ॥

ॐ मीढुष्टम शिवतम० बिभ्रदा गहि स्वाहा ॥ २९ ॥

ॐ विकिरिद्र विलोहित० विपन्तु ताः स्वाहा ॥ ३० ॥

ॐ सहस्राणि सहस्रशो० मुखा कृधि स्वाहा ॥ ३१ ॥

ॐ असंख्याता सहस्राणि० तन्मसि स्वाहा ॥ ३२ ॥

ॐ अस्मिन् महत्यर्णवे० तन्मसि स्वाहा ॥ ३३ ॥

ॐ नीलग्रीवाः शितिकण्ठा दिवर्ठ० रुद्रा० तन्मसि स्वाहा ॥ ३४ ॥

ॐ नीलग्रीवाः शितिकण्ठाः शर्व्वाऽ अधः० तन्मसि स्वाहा ॥ ३५ ॥

ॐ ये वृक्षेषु० तन्मसि स्वाहा ॥ ३६ ॥

ॐ ये भूतानामधिपतयो० तन्मसि स्वाहा ॥ ३७ ॥

ॐ ये पथां पथि रक्षयऽ ऐल० तन्मसि स्वाहा ॥ ३८ ॥

ॐ ये तीर्थानि० तन्मसि स्वाहा ॥ ३९ ॥

ॐ येऽन्नेषु० तन्मसि स्वाहा ॥ ४० ॥

ॐ यऽ एतावन्तश्च० तन्न्मसि स्वाहा ॥ ४१ ॥

ॐ नमोऽस्तु रुद्रेभ्यो ये दिवि० जम्भे दध्मः स्वाहा ॥ ४२ ॥

ॐ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे० जम्भे दध्मः स्वाहा ॥ ४३ ॥

ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्न० जम्भे दध्मः स्वाहा ॥ ४४ ॥

(६) अथाष्टचत्वारिंशद्धवनमन्त्रविभागपक्षः षष्ठः ।

ॐ नमस्ते रुद्र मन्यव० मुतते नमः स्वाहा ॥ १ ॥

ॐ या ते रुद्र शिवा० चाकशीहि स्वाहा ॥ २ ॥

ॐ यामिषुङ्गिरिशन्त० पुरुषं जगत् स्वाहा ॥ ३ ॥

ॐ शिवेन व्वचसा त्वा गिरिशाच्छा० सुमनाऽ असत् स्वाहा ॥ ४ ॥

ॐ अध्यवोचदधिवक्ता० परासुव स्वाहा ॥ ५ ॥

ॐ असौ यस्ताम्रोऽ अरुणऽ उत० हेडऽ ईमहे स्वाहा ॥ ६ ॥

ॐ असौ योऽवसर्प्पति नीलग्ग्रीवो० मृडयाति नः स्वाहा ॥ ७ ॥

ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे० करन्नमः स्वाहा ॥ ८ ॥

ॐ प्रमुञ्च धन्न्वनस्त्वमुभयोरात्न्योंर्ज्ज्याम्० भगवो व्वप स्वाहा ॥ ९ ॥

ॐ व्विज्ज्यन्धनुः कपर्द्दिनो० निषङ्गधिः स्वाहा ॥ १० ॥

ॐ या ते हेतिर्म्मीढुष्टम हस्ते० परिब्भुज स्वाहा ॥ ११ ॥

ॐ परि ते धन्न्वनो हेतिरस्मान्न्वृणक्तु० निधेहितं स्वाहा ॥ १२ ॥

ॐ अवतत्य धनुष्ट्वᳬं० सहस्राक्ष शतेषुधे० सुमना भव स्वाहा ॥ १३ ॥

ॐ नमस्तऽ आयुधायाना० तव धन्न्वने स्वाहा ॥ १४ ॥

ॐ मा नो महान्तमुत० रुद्र रीरिषः स्वाहा ॥ १५ ॥

ॐ मा नस्तोके तनये मा नऽ आयुषि० सदमित्त्वा हवामहे स्वाहा ॥ १६ ॥

ॐ नमो हिरण्यबाहवे० स्वाहा। ॐ नमो बब्भ्लुशाय० स्वाहा। ॐ नमो-
रोहिताय० स्वाहा। ॐ नमः कृत्स्नायतया० स्वाहा। ॐ नमो व्वञ्चते
परिवञ्चते० व्विकृन्तानां पतये स्वाहा।
इति पञ्चमन्त्राणामेकाहुतिः ॥ १७ ॥

ॐ नमऽ उष्णीषिणे गिरिचराय० स्वाहा । ॐ नमो विसृजद्भ्यो विध्य- द्भ्यश्च० स्वाहा । ॐ नमः सभाभ्यः सभा० स्वाहा । ॐ नमो गणेभ्यो गणपतिभ्यश्च० स्वाहा । ॐ नमः सेनाभ्यः सेनानिभ्यश्च० अर्भ- केभ्यश्च वो नमः स्वाहा ।

इति पञ्चमन्त्राणामेकाहुतिः ॥ १८ ॥

ॐ नमस्तक्षभ्यो रथकारेभ्यश्च० स्वाहा । ॐ नमः श्वभ्यः श्वपतिभ्यश्च० स्वाहा । ॐ नमः कपर्दिने च व्युप्तकेशाय० स्वाहा । ॐ नमो ह्रस्वाय च वामनाय० स्वाहा । ॐ नमऽ आशवे चाजिराय च० द्वीप्याय च स्वाहा ।

इति पञ्चमन्त्राणामेकाहुतिः ॥ १९ ॥

ॐ नमो ज्येष्ठाय च कनिष्ठाय च० स्वाहा । ॐ नमः सोभ्याय च प्रति- सर्याय च० स्वाहा । ॐ नमो वन्याय च कक्ष्याय च० स्वाहा ।

ॐ नमो बिल्मिने च कवचिने च० स्वाहा। ॐ नमो धृष्णवे च प्रमृशाय च० सुधन्वने च स्वाहा।
इति पञ्चमन्त्राणामेकाहुतिः ॥ २० ॥
ॐ नमः स्रुत्याय च पथ्याय च० स्वाहा। ॐ नमः कूप्याय चावट्याय च० स्वाहा। ॐ नमो वात्याय च रेष्म्याय च० स्वाहा। ॐ नमः शङ्गवे च पशुपतये च० हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय स्वाहा।
इति चतुर्मन्त्राणामेकाहुतिः ॥ २१ ॥
ॐ नमः शम्भवाय च० शिवतराय च स्वाहा ॥ २२ ॥
ॐ नमः पार्याय चावार्याय च० स्वाहा। ॐ नमः सिकत्याय प्रवाह्याय च० स्वाहा। ॐ नमो व्रज्ज्याय च गोष्ठ्याय च० स्वाहा। ॐ नमः शुष्क्याय च हरित्याय च० स्वाहा। ॐ नमः पर्ण्णाय च पर्ण्णशदाय च० धनुष्कृद्भ्यश्च वो नमः स्वाहा ॥ २३ ॥
ॐ नमो वः किरिकेभ्यः स्वाहा ॥ २४ ॥

LIBRARY
ACCESSION NO. 11960
Date 15/12/83

ॐ देवानाᳬ᳭० हृदयेभ्यः स्वाहा ॥ २५ ॥
ॐ नमो व्विचिन्वत्केभ्यः स्वाहा ॥ २६ ॥
ॐ नमो व्विक्षिणत्केभ्यः स्वाहा ॥ २७ ॥
ॐ नमऽ आनिर्हतेभ्यः स्वाहा ॥ २८ ॥
ॐ द्रापेऽ अन्धसस्पते० किञ्चनाममत् स्वाहा ॥ २९ ॥
ॐ इमा रुद्राय तवसे० अस्मिन्ननातुरम् स्वाहा ॥ ३० ॥
ॐ या ते रुद्र शिवा० मृडजीवसे स्वाहा ॥ ३१ ॥
ॐ परि नो रुद्रस्य० तनयाय मृड स्वाहा ॥ ३२ ॥
ॐ मीढुष्टम शिवतम शिवो नः० बिभ्रदा गहि स्वाहा ॥ ३३ ॥
ॐ व्विकिरिद्र० न्नि वपन्तु ताः स्वाहा ॥ ३४ ॥
ॐ सहस्राणि सहस्रशो० मुखा कृधि स्वाहा ॥ ३५ ॥
ॐ असंख्याता० धन्वानि तन्नमसि स्वाहा ॥ ३६ ॥
ॐ अस्मिन्महत्यर्णवेऽन्तरिक्षे० तन्नमसि स्वाहा ॥ ३७ ॥

ॐ नीलग्रीवाः शितिकण्ठा दिवᳬं॰ तन्नमसि स्वाहा ॥ ३८ ॥
ॐ नीलग्रीवाः शितिकण्ठाः शर्वाऽ॰ तन्नमसि स्वाहा ॥ ३९ ॥
ॐ ये वृक्षेषु शष्पिञ्जरा॰ तन्नमसि स्वाहा ॥ ४० ॥
ॐ ये भूतानामधिपतयो॰ तन्नमसि स्वाहा ॥ ४१ ॥
ॐ ये पथां पथि॰ जनेऽव धन्वानि तन्नमसि स्वाहा ॥ ४२ ॥
ॐ ये तीर्थानि प्रचरन्ति॰ तन्नमसि स्वाहा ॥ ४३ ॥
ॐ येऽन्नेषु विविद्ध्यन्ति॰ तन्नमसि स्वाहा ॥ ४४ ॥
ॐ यऽ एतावन्तश्च भूयाᳬंसश्च॰ तन्नमसि स्वाहा ॥ ४५ ॥
ॐ नमोऽस्तु रुद्रेभ्यो ये दिवि॰ तमेषाञ्जम्भे दध्मः स्वाहा ॥ ४६ ॥
ॐ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे॰ तमेषाञ्जम्भे दध्मः स्वाहा ॥ ४७ ॥
ॐ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्न॰ तमेषां जम्भे दध्मः स्वाहा ॥४८॥

इति रुद्रयाग-हवनमन्त्रविधिः ।

अथ बृहत् पुरुषसूक्तन्यासः ।

(छन्दःपुरुषन्यासः)

आचमनम् । प्राणायामः । पवित्रधारणम् । पश्चात् शान्तिपाठः ।

सङ्कल्पः—देशकालौ सङ्कीर्त्य "अमुकगोत्रः अमुकशर्माहं (अमुकगोत्रेण अमुकशर्मणा यजमानेन वृतोऽहं वा) यजमानसङ्कल्पित-सनवग्रहविष्णुयागस्य पूर्वाङ्गत्वेन विहितं तिलकधारणं तुलसीमालाधारणं आसनविधिं छन्दःपुरुषन्यासं पुरुषसूक्तन्यासं च करिष्ये (करिष्यामि वा) ।"

ध्यानम्—कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभं
नासाग्रे वरमौक्तिकं करतले वेणुः करे कङ्कणम् ।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावलिः
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥

इत्यनेन तिलकं कुर्यात् । पश्चात् 'ॐ इदं विष्णुः०' इति मन्त्रेण तुलसीमालां धारयेत् । ततः 'ॐ ऊर्ध्वकेशि विरूपाक्षि०' इत्यनेन शिखाग्रन्थिकरणम् ।

सहस्राणीत्यस्य परमेष्ठी ऋषिरनुष्टुप्छन्दः एको रुद्रो देवता, महीप्रार्थने विनियोगः ।

ॐ सहस्राणि सहस्रशः० । ॐ यऽ एतावन्तश्च० ।

पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता, आसने विनियोगः ।

ॐ पृथ्वि त्वया धृता लोका० ।

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन हवनं च समारभे ॥

ॐ ये भूतानामधिपतयः० ।

इति दिग्बन्धं कृत्वा छन्दःपुरुषन्यासं कुर्यात् । तद्यथा—

ॐ तिर्यग्बिलाय छन्दःपुरुषायोर्ध्वबुध्नाय छन्दःपुरुषाय नमः इति शिरसि ।
ॐ गौतम-भरद्वाजाभ्यां नमः इति नेत्रयोः ।
ॐ विश्वामित्र-जमदग्निभ्यां नमः इति श्रोत्रयोः ।
ॐ वशिष्ठ-कश्यपाभ्यां नमः इति नासापुटयोः ।
ॐ अत्रये नमः इति वाचि ।
ॐ गायत्र्यै छन्दसे नमः अग्नये नमः इति शिरसि ।
ॐ उष्णिहे छन्दसे नमः सवित्रे नमः इति ग्रीवायाम् ।
ॐ बृहत्यै छन्दसे नमः बृहस्पये नमः इति अनूके (पृष्ठे) ।
ॐ बृहद्रथन्तराभ्यां नमः द्यावापृथिवीभ्यां नमः इति बाह्वोः ।
ॐ त्रिष्टुभे छन्दसे नमः इन्द्राय नमः इति मध्ये ।

ॐ जगत्यै छन्दसे नमः आदित्याय नमः इति श्रोण्योः।

ॐअतिच्छन्दसे नमः प्रजापतये नमः इति लिङ्गे।

ॐ यज्ञायज्ञियाय छन्दसे नमः वैश्वानराय नमः इति गुदे। (उदकोपस्पर्शः)।

ॐ अनुष्टुभे छन्दसे नमः विश्वेभ्यो देवेभ्यो नमः इति ऊर्वोः

ॐ पङ्क्त्यै छन्दसे नमः मरुद्भ्यो नमः इति जान्वोः।

ॐ द्विपदायै छन्दसे नमः विष्णवे नमः इति पादयोः।

ॐ विच्छन्दसे नमः वायवे नमः इति नासापुटस्थप्राणेषु।

ॐ न्यूनाक्षराय छन्दसे नमः अद्भ्यो नमः इति हस्तद्वयविपर्यासेन मस्तकादिपादान्तम्।

इति छन्दःपुरुषन्यासः।

सहस्रशीर्षेत्यादि-षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः, आद्यानां पञ्चदशानामनुष्टुप्छन्दः, यज्ञेन यज्ञमित्यस्य त्रिष्टुप्छन्दः, जगद्बीजं नारायणपुरुषो देवता, न्यासे हवने च विनियोगः।

१ ॐ सहस्रशीर्षा० वामकरे।

२ ॐ पुरुष ऽएव० दक्षिणकरे।

३ ॐ एतावानस्य० वामपादे।

४ ॐ त्रिपादूर्ध्वः० दक्षिणपादे।

५ ॐ ततो विराडजायत०	वामजानौ ।
६ ॐ तस्माद्यज्ञात् सर्वहुतः०	दक्षिणजानौ ।
७ ॐ तस्माद्यज्ञात् सर्वहुतऽऋचः०	वामकट्याम् ।
८ ॐ तस्मादश्वा०	दक्षिणकट्याम् ।
९ ॐ तं यज्ञं बर्हिषि०	नाभौ ।
१० ॐ यत्पुरुषं व्यदधुः०	हृदये ।
११ ॐ ब्राह्मणोऽस्य०	वामबाहौ ।
१२ ॐ चन्द्रमा मनसः०	दक्षिणबाहौ ।
१३ ॐ नाभ्या ऽआसीदन्त०	कण्ठे ।
१४ ॐ यत्पुरुषेण हविषा०	मुखे ।
१५ ॐ सप्तास्यासन्०	अक्ष्णोः ।
१६ ॐ यज्ञेन यज्ञम्०	मूर्ध्नि ।

पुन :—

१ ॐ ब्राह्मणोऽस्य०	हृदयाय नमः ।
२ ॐ चन्द्रमा मनसः०	शिरसे स्वाहा ।
३ ॐ नाभ्या ऽआसीदन्त०	शिखायै वषट् ।

४ ॐ यत्पुरुषेण हविषा० कवचाय हुम् ।
५ ॐ सप्तास्यासन्० नेत्रत्रयाय वौषट् ।
६ ॐ यज्ञेन यज्ञम्० अस्त्राय फट् ।

ध्यानम्—ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ १ ॥
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ २ ॥

इति बृहत् पुरुषसूक्तन्यासः ।

अथ विष्णुयागमन्त्राः ।

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिर्ठं॰ सर्वतः स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
पुरुषऽ एवेदर्ठं॰ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥
त्रिपादूर्ध्वऽ उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशनेऽ अभि ॥ ४ ॥
ततो विराडजायत विराजोऽ अधि पूरुषः ।
सजातोऽ अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥

तस्माद्यज्ञात्सर्व्वहुतऽ ऋचः सामानि जज्ञिरे ।
छन्दाᳫंसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
तस्मादश्वाऽ अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः ॥ ८ ॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ।
तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥ ९ ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत्किं बाहू किमूरू पादाऽ उच्येते ॥ १० ॥
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याᳫं शूद्रोऽ अजायत ॥ ११ ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽ अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

नाभ्याऽ आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्यां भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ२ऽ अकल्पयन् ॥ १३ ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्मऽ इध्मः शरद्धविः ॥ १४ ॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाऽ अबध्नन्पुरुषं पशुम् ॥ १५ ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः ॥ १६ ॥
(शुक्लयजुर्वेद ३१।१-१६)

अथ [1]श्रीसूक्तन्यासः ।

हिरण्यवर्णामिति पञ्चदशर्चस्य सूक्तस्य आनन्द-कर्दम-चिक्लीतेन्दिरासुता ऋषयः, आद्यानां तिसृणामनुष्टुप्छन्दः, चतुर्थ्याः प्रस्तारपंक्तिश्छन्दः, पञ्चमीषष्ठ्योस्त्रिष्टुप्छन्दः, ततोऽष्टानामनुष्टुप्छन्दः, अन्त्यायाः प्रस्तारपंक्तिश्छन्दः, न्यासे हवने च विनियोगः ।

१ ॐ हिरण्यवर्णाम्० ।	वामकरे ।
२ ॐ तां म आ वह० ।	दक्षिणकरे ।
३ ॐ अश्वपूर्वाम्० ।	वामपादे ।
४ ॐ कां सोस्मिताम्० ।	दक्षिणपादे ।
५ ॐ चन्द्रां प्रभासाम्० ।	वामजानौ ।
६ ॐ अदित्यवर्णे० ।	दक्षिणजानौ ।
७ ॐ उपैतु माम्० ।	वामकट्याम् ।

---

१. हिरण्यवर्णामिति पञ्चदशर्चस्य श्रीसूक्तस्य आनन्द-कर्दम-चिक्लीतेन्दिरासुता ऋषयः, आद्यत्रयस्यानुष्टुप्छन्दः, कां सोऽस्मीत्यस्य बृहतीछन्दः, चन्द्रां प्रभासामिति द्वयोस्त्रिष्टुप्छन्दः, उपैतु मां देवसख इत्यष्टकस्यानुष्टुप्छन्दः, अन्त्यस्य प्रस्तारपंक्तिश्छन्दः, श्रीरग्निश्च देवते, व्यञ्जनानि बीजानि, स्वराः शक्तयः, बिन्दुः कीलकम्, महालक्ष्मीप्रीत्यर्थं न्यासे हवने च विनियोगः ।

८ ॐ क्षुत्पिपासामलाम्० ।	दक्षिणकट्याम् ।
९ ॐ गन्धद्वाराम्० ।	नाभौ ।
१० ॐ मनसः काममाकूतिम्० ।	हृदये ।
११ ॐ कर्दमेन प्रजा भूता० ।	वामबाहौ ।
१२ ॐ आपः सृजन्तु० ।	दक्षिणबाहौ ।
१३ ॐ आर्द्रां पुष्करिणीम्०	कण्ठे ।
१४ ॐ आर्द्रां यः करिणीम्० ।	मुखे ।
१५ ॐ तां म आ वह०	नेत्रयोः ।
१६ ॐ यः शुचिः प्रयतो भूत्वा०	मूर्ध्नि ।

पुनः—

१ ॐ कर्दमेन प्रजा भूता०	हृदयाय नमः ।
२ ॐ आपः सृजन्तु०	शिरसे स्वाहा ।
३ ॐ आर्द्रां पुष्करिणीम्०	शिखायै वषट् ।
४ ॐ आर्द्रां यः करिणीम्०	कवचाय हुम् ।

५ ॐ तां म आ वह० नेत्राभ्यां वौषट्।
६ ॐ यः शुचिः प्रयतो भूत्वा० अस्त्राय फट्।

ध्यानम्—या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भै-
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥ १ ॥
अमलकमलसंस्था तद्रजःपुञ्जवर्णा
करकमलधृतेष्टाभीतियुग्माम्बुजा च।
मणिमुकुटविचित्रालङ्कृताकल्पजालै-
र्भवतु भुवनमाता सन्ततं श्रीः श्रियै नः ॥ २ ॥

इति श्रीसूक्तन्यासः।

अथ लक्ष्मीयागमन्त्राः।

ॐहिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥ १॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ २॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्।
श्रियं देवीमुप ह्वये श्रीर्मा देवी जुषताम्॥ ३॥
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोप ह्वये श्रियम्॥ ४॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे॥ ५॥

आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसानुदन्तु या अन्तरा या बाह्या अलक्ष्मीः ॥ ६ ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७ ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ ८ ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम् ॥ ९ ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥

कर्दमेन प्रजा भूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ॥ १३ ॥
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ॥ १४ ॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥ १५ ॥
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥

(ऋग्वेद, परिशिष्टभाग)

रुद्रयागसङ्कल्पः ।

देशकालौ सङ्कीर्त्य 'अमुकगोत्रःअमुकशर्माहं मम सकुटुम्बस्य सपरिवारस्य तथा चान्येषां जनानां विशेषतः एतत्प्रान्तीयानां सर्वेषां स्त्रीपुंसानां च नित्यकल्याणप्राप्त्यर्थं कायिक-वाचिक-मानसिक-सांसर्गिकचतुर्विधपापक्षयपूर्वकमाध्यात्मिक-आधिदैविक-आधिभौतिक-त्रिविधतापोपशान्तिसकलदुःखाशेषनिवृत्तिपरमपदप्राप्तिव्याध्यादिजरा-मृत्यु-रोग-भय-शोकाद्युपसर्गनिर्मुक्तिधन-धान्य-दीर्घायुष्ट्व-नैरुज्य-कीर्तिलाभ-सद्विद्योपार्जन-क्षेम-स्थैर्यैश्वर्य-स्थिरलक्ष्मी-गो-गजाश्वादिसम्पत्प्रवृद्धये पवित्रतमास्मद्भारतदेशनिवासिनां सनातनधर्मश्रद्धावतां इतोऽप्यधिकं सनातनधर्मे श्रद्धाभिवृद्ध्यर्थमविद्यमानश्रद्धानामन्येषां जनानां सनातनधर्मेऽस्मिन् निरतिशयश्रद्धाभक्तिसम्पत्त्यर्थं सनातनधर्मप्रतिपादकानां पुराणान्तानां धार्मिकग्रन्थानां सर्वासां विद्यानां चाभिवृद्ध्यर्थम्, विशेषतः सनातने स्वधर्मे प्रीतिविवर्द्धनार्थम्—

सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥

इति सदुद्देश्यसिद्धिद्वारा विश्वस्मिन् जगति सर्वविधशान्त्यर्थं धर्मग्लान्यधर्माभ्युत्थाननिवृत्तिपूर्वकं धर्मसंस्थापनार्थं च पुण्यकालेऽस्मिन् श्रीसाम्बसदाशिवप्रीत्यर्थं सग्रहमखं हवनात्मकं (अभिषेकात्मकं) महारुद्रयागं महारुद्राभिषेकं चतुर्णां वेदानां पारायणं श्रीमद्भागवत-विष्णु-पुराण-वाल्मीकीयरामायण-गीता-दुर्गादिपाठं नवग्रहादिजपं च एभिर्द्विजैर्निखिलगुणगणभरितैर्विद्वद्भिः सह अद्यारभ्य पूर्णाहुत्यन्तं करिष्ये ।'

विष्णुयागस्य बृहत् सङ्कल्पः।

विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारते वर्षे आर्यावर्तैकदेशे अमुकक्षेत्रे अमुकनद्याः अमुके तीरे विक्रमशके बौद्धावतारे अमुकनाम्नि संवत्सरे अमुकायने अमुकऋतौ महामाङ्गल्यप्रदमासोत्तमे मासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोऽमुकशर्माहं अनाद्यविद्यावासनावासितान्तःप्रवृत्त्या प्रवर्त्तमानेऽस्मिन् महति संसारचक्रे विचित्राभिः कर्मगतिभिः विचित्रासु योनिषु अनेकधा जनित्वा केनापि पुण्यकर्मविशेषेण भगवत्कृपाकटाक्षवीक्षणात्मसहायेन साम्प्रतिकं दुर्लभातिदुर्लभं मानवं देहमासादितवतः आजन्मनः सर्वास्ववस्थासु वाक्-पाणि-पाद-पायूपस्थ-घ्राण-रसन-श्रुति-चक्षुस्त्वङ्मनः सम्पादितैः ऐन्द्रियकव्यापारविशेषैः प्रतिफलितानां ज्ञाताज्ञातावस्थासम्भवानां समेषामेनसामपनोदपूर्वकं मम सकुटुम्बस्य सपरिवारस्य अस्मिन् महायज्ञे कायिक-वाचिक-मानसिक-आर्थिकसहयोगेन साहाय्य-

कारिणाम्, सर्वेषां भारतवर्षवास्तव्यानां चतुराश्रमस्थानां चातुर्वर्ण्यानां जनानाम्, विशेषतः एतत्प्रान्तीयानां सर्वेषां आबालवृद्धवनितानां गो-महिष्यादिसमस्ततिरश्चां च कायिक-वाचिक-मानसिक-सांसर्गिकचतुर्विधपापक्षयपूर्वकम्, आध्यात्मिक-आधिदैविक-आधिभौतिकत्रिविध-तापोपशान्तिसकलदुःखाशेषनिवृत्तिपूर्वकम्, व्याध्यादि जरा-मृत्यु-रोग-भय-शोकाद्युपसर्गनिवृत्तिपुरस्सरम्, जन्मकुण्डल्याम्, वर्षकुण्डल्याम्, गोचरे च अरिष्टस्थितानाम्, आदित्यादिनवग्रहाणामशुभफलनिरासपूर्वकम्, लग्नस्थमन्दार्क-पातालस्थभौम-मिथुनस्याञ्जनवमस्याशिखि-गोचराष्टकस्य जीव-ग्रहजन्यजायमान-जनिष्यमाणसकलारिष्टनिवृत्तिपूर्वकम्, अङ्गारकादिक्रूरसम्मेलनसम्भाव्यदिव्यभौमान्तरिक्षसर्वोपप्लवादिसर्वापच्छान्त्यर्थम्, अतिवृष्टि-अनावृष्टि-भूकम्प-राष्ट्रविप्लव-दुर्भिक्षादिविविध-आधि-व्याधि-विविधकष्टनिवृत्ति पूर्वकनित्यकल्याणप्राप्त्यर्थम्, विपुलधन-धान्य-दीर्घायुष्ट्व-नैरुज्य-कीर्तिलाभ-सद्विद्योपार्जन-क्षेम-स्थैर्यैश्वर्य-गो-गजाश्वादिसम्पत्प्रवृद्ध्यर्थम्, सद्धर्म-सद्बुद्धि-सद्विद्या-सद्विवेक-सदाचारादिप्राप्त्यर्थम्, तथैकविंशतिकुलोद्धरणपूर्वकं समस्तपितॄणां निरतिशयानन्दशाश्वतवैकुण्ठलोकप्राप्त्यर्थं च सनातनधर्मेऽस्मिन् निरतिशयश्रद्धाभक्तिसम्पत्त्यर्थं सनातनधर्मप्रतिपादकानां साङ्गानां सरहस्यानां श्रुति-स्मृति-पुराणोपपुराणादीनां धार्मिकग्रन्थानां सर्वासां विद्यानां चाभिवृद्ध्यर्थम्, साधूनां महात्मनां ब्रह्मज्ञानाभिवृद्ध्यर्थम्, ब्राह्मणानां तपोऽभिवृद्ध्यर्थम्, क्षत्रियाणां तेजोऽभिवृद्ध्यर्थम्, वैश्यानां वाणिज्याभिवृद्ध्यर्थम्, शूद्राणां

शुक्लयजुर्वेदीय रुद्राष्टाध्यायी

(सम्पादक—याज्ञिकसम्राट् पण्डित वेणीरामशर्मा गौड वेदाचार्य)

इस रुद्राष्टाध्यायीमें रुद्राभिषेककी विधि, रुद्राभिषेकके नमक-चमकके पाठका क्रम, शतरुद्रिय पाठकी विधि, रुद्रीपाठका विविध फल, रुद्राभिषेकके लिये विविध द्रव्य और उनके विविध फल, गवय-शृङ्गसे रुद्राभिषेकका महत्त्व, शतरुद्रियके पाठका महत्त्व, रुद्राष्टाध्यायीके पाठका महत्त्व, शिवपूजनविधि, ब्राह्मणवरण-पूजनविधि और शिवके उत्तरपूजनादिकी विधि दी गयी है। अन्तमें रुद्रयज्ञके हवनकी ७ प्रकारकी आहुतियों का भी अलग-अलग उल्लेख किया है, जिनसे यज्ञाचार्य और हवनकर्ताओंको विशेष लाभ होगा। सर्वान्तमें रुद्राभिषेककी सामग्री दी गयी है। ८—००

प्राप्तिस्थान—चौखम्भा ओरियन्टालिया, पो० बा० नं० ३२ वाराणसी, दिल्ली

[illegible]

[illegible]

सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः ।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥

[illegible]